This is a reproduction of a library book that was digitized by Google as part of an ongoing effort to preserve the information in books and make it universally accessible.

Google™ books

http://books.google.com



॥ विक्रमोर्व्वशीनाम नाटकं ॥

VIKRAMORVASI;

OR

VIKRAMA AND URVASI:

A DRAMA.

By KÁLIDÁSA.

With a Commentary,

EXPLANATORY OF THE PRAKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD;

AND SOLD AT THEIR DEPOSITORY, PATALDANGA.


1830.

Digitized by Google

De Gubernatis
E
2
70



Wm. H. Allen & Co.
Booksellers, Publishers & Importers of
Oriental Works;
7 Leadenhall Street
Maps, Charts, Stationary &c.



Digitized by Google

VALUABLE ORIENTAL WORKS

OF THE

ASIATIC SOCIETY OF BENGAL,

Published in London by

Wm. H. Allen & Co., 7, Leadenhall Street.

The Supreme Government of India having transferred to the Asiatic Society of Bengal, the Oriental Works which have been either wholly or in part published in Calcutta, under the authority of the General Committee of Public Instruction, the Society is enabled to direct the disposal of them at the

FOLLOWING REDUCED PRICES.

---

1. MOOLUKHKHUS-OOL-TUWAREEKH, being an Abridgment of the celebrated Historical Work called the Seir Mootakherin, prepared chiefly by Maulavi Abdool Kerim. (Persian). Royal 4to. £1. 5s. boards.

2. MOOJIZ-OOL-QANOON: a Medical Work, by Alee bin Alee Il Huzm, the Karashite, commonly known by the name of Ibn-ool-Nufees. (Arabic). 4to. 10s. 6d. boards.

3. BHATTI KAVYA; a Poem, on the Actions of Rama; with the Commentaries of Jayamangala and Bharatamallika. (Sanscrit). 2 vols. Royal 8vo. £1. 10s. boards.

4. LAGHU KAUMUDI: a Sanscrit Grammar, by Vadaraja. Royal 12mo. 5s. 6d. boards.

5. MUGDHABODHA: a Sanscrit Grammar, by Vopadeva. Royal 12mo. 5s. 6d. boards.

6. NYAYA SUTRA VRITTI: the Logical Aphorisms of Gotama, with a Commentary by Viswanáth Battáchárya. (Sanscrit). 8vo. 5s. 6d. boards.

7. BHASHA PARICHHEDA and SIDDHANTA MUKTAVALI: an Elementary Treatise on the Terms of Logic, with its Commentary, by Viswanatha Panchanana Bhatta. (Sanscrit.) Royal 8vo. 5s. 6d. boards.

8. LILAVATI: a Treatise on Arithmetic, translated into Persian from the Sanscrit work of Bhascara Acharya, by the celebrated Feizi. Royal 8vo. 5s. boards.

Ditto ditto, in Sanscrit. Royal 8vo. 5s. sewed.

9. SELECTIONS, Descriptive, Scientific, and Historical; translated from English and Bengalee into Persian, for the use of Native Youth. Royal 8vo. 7s. 6d. boards.

Digitized by Google

10. SAHITYA DERPANA: a Treatise on Rhetorical Composition, by Viswanath Kaviraja. (Sanscrit). Royal 8vo. 9s. boards.

11. FUTAWA ALEMGIRI: a Collection of Opinions and Precepts of Mohammedan Law, compiled by Sheikh Nazim and other learned men, by command of the Emperor Aurungzeb Alemgir. (Arabic). 6 vols. Royal 4to. £9.

Ditto ditto, Vol. 1 to 4, separate. £1. 10s. each.

"The *Fatáwéi Alemgiri* being four times the size of the Hidayah, and containing little more than a recital of law cases, without the arguments and proofs which are diffusely stated in the Hidayah, it must possess an advantage over that work, for practical use, in its greater number of cases and examples. Without contrasting their respective merits, however, the one is universally admitted to be a most useful supplement to the other; and a conversance in both, or an easy means of reference to them in cases of judicial occurrence, must be of essential use towards the due administration of the Mahommedan law, as far as that law is declared to be the established rule and standard of decision."—*Harington's Remarks on the Authorities of Mohammedan Law.* As. Res. X. 475.

12. Short ANATOMICAL DESCRIPTION of the HEART, extracted from the Edinburgh Medical Dictionary, and translated into Arabic, by JOHN TYTLER. 8vo. 2s. boards.

13. DAYA TATWA: a Treatise on the Law of Inheritance, by Raghunandana Bhattáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

14. DAYA KRAMA SANGRAHA: a Compendium of the Order of Inheritance, by Krishna Terkalankara Battáchárya. Edited by Lakshmi Náráyan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

15. DAYA BHAGA, or Law of Inheritance: a new Edition, with a Commentary by Krishna Terkalankara. (Sanscrit). 8vo. 8s. boards.

16. KAVYA PRAKASA: a Treatise on Poetry and Rhetoric, by Mammata Acharya. (Sanscrit). 8vo. 5s. 6d. boards.

17. VEDANTA SARA: Elements of Theology, according to the Vedas, by Sadánanda Parivrajakáchárya; with a Commentary, by Ramakrishna Tirtha. (Sanscrit). 8vo. 5s. 6d. boards.

18. VYAVAHARA TATWA: a Treatise on Judicial Proceedings, by Raghunandana Bhattáchárya. Edited by Lakshmi Narayan Serma. (Sanscrit). 8vo. 2s. 6d. boards.

19. CH,HUTRU PRUKASH: a Biographical Account of Ch,hutru Sal, Raja of Boondelkhund, by Lal Kuvi. Edited by Capt. W. PRICE. (Brij Bhakha). 8vo. 8s. boards.

20. The KIFAYA, a Commentary on the Hidayah: a Treatise on the Questions of Mohammadan Law, by Hukeem Mouluvee Abdool Mujeed, and other learned men of Calcutta. (Arabic). Vols. 3 and 4. 4to. £3. sewed.

21. The INAYAH: a Commentary on the Hidayah: a Work on Mohummudan Law, compiled by Mohummud Akmulooddeen, Ibn Muhmood, &c. Edited by Moonshee Ramdhun Sen: with the aid of Mouluvees Hafiz Ahmud Kubeer, Futuh Ulee, and others. (Arabic). Vols. 3 and 4. 4to. £3. sewed. The second volume now in hand.

22. MITAKSHARA: a Compendium of Hindu Law, by Vijnáneswara: founded on the Texts of Yajnawalkya. The Vyavahara Section, or Jurisprudence. Edited by Sri Lakshmi Naráyán Nyayalancara. (Sanscrit). 8vo. 9s. 6d. sewed.

Digitized by Google

23. RAGHU VANSA, or Race of Raghu: a Historical Poem, by Kálidása, with a Prose Interpretation of the Text by Pundits of the Sanscrit College of Calcutta. (Sanscrit). Royal 8vo. 14s. sewed

24. ASHSHURH-OOL-MOOGNEE, COMMENTATIO ABSOLUTA: a Commentary on the Moojiz ool Kanoon, known by the name of The Sudeedee, compiled by the celebrated Physician Maulana Sudeed Kazroonee, on the Theory and Practice of Physic and the Materia Medica, &c. Edited by Hukeem Mouluvee Abbool Mujeed, and others. (Arabic). 4to. £1. 10s. sewed.

25. The MAHABHARATA: an Epic Poem, written by the celebrated Veda Vyása Rishi. Vol. I. (containing the Adi Parva—Sabha Parva—Vana Parva). Edited by learned Pundits. Royal 4to. £1. 10s. sewed. To be completed in Five Volumes.

"The Mahábhárat details the dissensions of the *Pándava* and *Kaurava* princes, who were cousins by birth, and rival competitors for the throne of Hastinapur. The latter were at first successful, and compelled the former to secrete themselves for a season, until they contracted an alliance with a powerful prince in the Panjáb, when a part of the kingdom was transferred to them. Subsequently this was lost by the *Pándavas* at dice, and they were driven into exile, from which they emerged to assert their rights in arms. All the princes of India took part with one or other of the contending kinsmen, and a series of battles ensued at *Kuru Kshetra*, the modern *Tahnesar*; which ended in the destruction of Daryodhana and the other *Kaurava* princes, and the elevation of Yudhishthira, the elder of the *Pándava* brothers, to the supreme sovereignty over India."—*Wilson*, As. Res. xvii. 609.

26. The RA'JA TARANGINI, a History of Cashmir. (Sanscrit). Royal 4to. £1. 5s. sewed.

"The only Sanscrit composition yet discovered to which the title of history can with any propriety be applied, is the *Rája Taranginí*, a History of Cashmir. This work was first introduced to the knowledge of the Mahomedans by the learned minister of Akber, Abulfazl, who has given a summary of its contents, taken from a Persian translation prepared by order of Akber." "Mr. Gladwin's English version of this abstract excited curiosity and stimulated inquiry, but the result was unsatisfactory, and a long period intervened before the original work was discovered. Sir William Jones was unable to meet with it, although the history of India from the *Sanscrit Cashmír* authorities was amongst the tasks his undaunted and indefatigable intellect had planned; it was not until the year 1805 that Mr. Colebrooke was successful in his search. He procured a copy of the work from the heirs of a brahmin who died at Calcutta, and about the same time another transcript was obtained by Mr. Speke from Lucknow. I purchased a third brought for sale to Calcutta; and I have been hitherto unable to meet with any other transcript of this version."—*Wilson's Essay on the History of Cashmír.* As. Res. xvi. 1.

27. The SUSRUTA, or System of Medicine, taught by Dhanwantari, and composed by his disciple Susruta (Sanscrit). Vol. I. 8vo.; 9s., to be completed in two volumes.

"The author of the *Sausruta*, which ranks the second work in antiquity, and is decidedly the first in merit of the Hindu writers on the medical art. Susruta is the only one who attempts to lay down a systematic course of proceeding (in cases of leprosy)."—*Wilson on Kushta or Leprosy, as known to the* HINDUS, Trans. Med. Soc. Cal. i. 26.

28. The JAWA'ME UL ILM UL RIYAZI', an Arabic translation of Hutton's Mathematics, by Dr. J. Tytler. Part I. Arithmetical Notation to Tables of Powers and Roots. 4to., 9s.

29. MRICHCH,HAKATI, a Comedy, by Sudraka Raja; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 12s. sewed.

30. UTTARA RAMA CHERITRA, or Continuation of the History of Rama: a Drama, in Seven Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

31. MALATI and MADHAVA: a Drama in Ten Acts, by Bhavabhuti; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

32. MUDRA RAKSHASA, or the Signet of the Minister; a Drama in Seven Acts, by Visakha Datta; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

33. RETNAVALI, a Drama in Four Acts, by Shri Hersha Deva;

Digitized by Google

with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. 6d. sewed.

34. VIKRAMORVASI, or Vikrama and Urvasi: a Drama, by Kálidása; with a Commentary, explanatory of the Prakrit Passages. (Sanscrit). 8vo. 2s. sewed.

Works in Progress.

1. The NAISHADA, a popular Sanscrit Poem, with Commentary by a Pandit of the Government Sanscrit College. In 8vo.; 600 pages, or one-third of the whole, printed.

"This poem is universally read by students of the Sanscrit language, as a poetical class book. It was on this account recommended for publication to the Committee of Instruction. It bears the name of Srí Harsha, whose reputation rests altogether on this pleasing and popular version of the famed episode of Nala and Damayanti, a subject which has also engaged the pens of other celebrated Indian writers, after its first narration in the Mahábhárata.

2. The SARIRA VIDYA, a Sanscrit translation of Hooper's Vade-Mecum, by Madan Mohan, Physician to the Sanscrit College. In 8vo.; one quarter printed.

3. The KHA'ZA'NAT UL ILM. (Persian). 1 vol. large 4to., 620 pages, with numerous Lithographed Plates; one-fifth remains to be completed, which will occupy ten months.

Of this work, it is unnecessary to say more than that it contains a whole course of European mathematical and geometrical instruction, drawn up in Persian by Khán Jí, a learned native Munshi at Patna, since dead, aided by Dr. J. Tytler. It was intended, and is particularly well adapted, for the use of Seminaries, where the Persian language is read.

4. The ANIS UL MASARRAHI'N, an Arabic translation of Hooper's Vade-Mecum, by Dr. J. Tytler. In 4to., 320 pages. The Index or Glossary of Terms remains unfinished.

It is unnecessary to add (for the English reader) any notice of Dr. Tytler's translations of Hutton's Mathematics and Hooper's Vade Mecum into Arabic. The great learning of the Translator is sufficient warrant of his having executed his task in the best manner.

5. A TREATISE on ALGEBRA, in Arabic, proceeding on the basis of a translation of Bridge's Treatise, but much modified and enlarged: with an Appendix on the application of Analysis to Geometry and Trigonometry, by the Rev. Dr. Mill. 8vo., printed at Bishop's College. The first and second parts finished, to the end of Plane Trigonometry: the continuation of the Appendix to Spherics remains to be passed through the press.

A DICTIONARY, TIBETAN and ENGLISH, prepared with the assistance of the Bandé Sangs-Rgyas Phun-Tshogs, a learned Láma of Zangskár, by ALEXANDER CSOMA DE KÖRÖS. In 4to.; 25s. sewed.

A GRAMMAR of the TIBETAN LANGUAGE, in ENGLISH, by Alexander Csoma de Körös. In 4to.; 18s. sewed.

ASIATIC RESEARCHES; or Transactions of the Society, instituted in Bengal, for inquiring into the History, the Antiquities, the Arts and Sciences, and Literature of Asia. Vols. 17 and 18. Royal 4to.; £2. 2s. each, boards. Also, former volumes.

INDEX to ASIATIC RESEARCHES. Royal 4to. 15s. sewed.

JOURNAL of the ASIATIC SOCIETY of BENGAL. January 1832, to December 1835. 2s. 6d. each.

Digitized by Google

Digitized by Google

Digitized by Google

VIKRAMORVASI;

OR

VIKRAMA AND URVASI:



A DRAMA.

By KÁLIDÁSA.

With a Commentary,

EXPLANATORY OF THE PRÁKRIT PASSAGES.

PUBLISHED UNDER THE AUTHORITY OF THE COMMITTEE OF PUBLIC INSTRUCTION.

Calcutta:

PRINTED AT THE EDUCATION PRESS, CIRCULAR ROAD.

1830.

Digitized by Google

Digitized by Google

॥ विक्रमोर्व्वशीनाम त्रोटकं ॥

श्रीकालिदासमहाकविविरचितं

साधारणविद्यावृद्ध्यर्थकसमाजाधिपतीनामाज्ञया

कलिकातानगरीस्थ इडुकेशनयन्त्रालये

प्राकृतभाषाव्याख्यासहितं

मुद्रितमभूत्।

१८३०

Digitized by Google

॥ विक्रमोर्व्वशी ॥

॥ प्रथमाङ्कः ॥

॥ नान्दी ॥

वेदान्तेषु यमाहुरेकपुरुषं व्याप्य स्थितं रोदसी,
यस्मिन्नीश्वरइत्यनन्यविषयः शब्दो यथार्थाक्षरः;
अन्तर्यश्च मुमुक्षुभिर्नियमितप्राणादिभिर्मृग्यते,
स स्थाणुः स्थिरभक्तियोगसुलभो निःश्रेयसायास्तु वः।

॥ नान्द्यन्ते सूत्रधारः ॥

अलमतिविस्तरेण ॥ नेपथ्याभिमुखमवलोक्य ॥ मारिष, परिषदेषा पूर्व्वेषां कवीनां दृष्टरसप्रबन्धा, अहमस्यां कालिदास ग्रथितवस्तुना विक्रमोर्व्वशीनाम्ना नवेन तोटकेनोपस्थास्ये; तदुच्यतां प्राचवर्गः, क्वेषु स्थानेष्ववहितैर्भवितव्यं भवद्भिरिति।

॥ प्रविश्य ॥ नटः। यथाज्ञापयति देवः।

सूत्रः। यावदस्यामार्य्यविदग्धमिश्रान् शिरसा प्रणिपत्य विज्ञापयामि;

प्रणयिषु दाक्षिण्यवशाद्यदि वा यदस्तुबहुमानात्,
शृणुत मनाग्मवधानात् क्रियामिमां कालिदासस्य।

Digitized by Google

॥ नेपथ्ये ॥ अज्जा परित्तायध, परित्तायध (१)।

सूचः। अये किमयमकस्मादिमानचारिणामाकाशे करुण ध्वनिः श्रूयते ॥ विचिन्त्य ॥ आं, ज्ञातं भवतु।

आरूढवा नरसखस्य मुनेः सुरस्त्री,
कैलासनाथमुपसृत्य निवर्त्तमाना;
वन्दीकृता विबुधशत्रुभिरर्द्धमार्गे,
क्रन्दत्यतः शरणमस्मरसां गणोऽयं।

इति निष्क्रान्तौ प्रस्तावना।

॥ ततः प्रविशत्यपटीक्षेपेणासुरसः ॥

असुरसः। अज्जा परित्तायध, परित्तायध, जो अमर पक्खवादीजस्स वा अम्बरदले गदी अत्थि (२)।

॥ ततः प्रविशत्यपटीक्षेपेण रथारूढोराजा सूतश्च।

राजा। अलमाक्रन्दितेन; सूर्य्योपस्थानसंनिवृत्तं पुरूरवसं मामेत्य कथ्यतां, कुतोभवत्यः परित्रातव्या इति।

रम्भा। असुरावलेपादो (३)।

राजा। किमसुरावलेपेन भवतीनामपराद्धं।

---

(१) आर्य्याः परित्रायध्वं परित्रायध्वं।

(२) आर्य्याः परित्रायध्वं परित्रायध्वं योऽमरपक्षपाती यस्य वाम्बरतले गतिरस्ति।

(३) असुरावलेपात्।

Digitized by Google

रम्भा। सुणादु महाराओ; जा तवोविसेसचिन्धिदस्स सुकुमारं पहरणं महेन्दस्स पच्चादेसो रूअगव्विदाए गिरि गोरीए अलङ्कारो सग्गस्स, सा णो पिअसही, कुवेरभवणादो णिअत्तमाणा, केणावि दाणवेण चित्तलेखादुदिआ अद्धवध ज्जेव णिग्गिहिदा (१)।

राजा। परिज्ञायते कृतमेन दिग्विभागेन गतः स जाल्यः।

अप्सरसः। दक्खाणीए दिसाए (२)।

राजा। तेन हि मुच्यतां विषादो, यतिष्ये वः सखीप्रत्या नयनाय।

अप्सरसः॥ सहर्षं॥ अरिहं एदं सोमवंससम्भवस्स (३)।

राजा। क्व पुनर्मां भवत्यः प्रतिपालयिष्यन्ति।

अप्सरसः। एदस्सि हेमकुडसिहरे (४)।

राजा। सूत, ऐशानीं दिशं प्रति प्रेरयाश्वानाह्वगमनाय।

---

(१) गृणोतु महाराजोया; तपोविशेषशङ्कितस्य सुकुमारं प्रहरणं महेन्द्रस्य प्रत्यादेशोरूपगर्व्विताया: श्रीगौर्य्याअलङ्कार: स्वर्गस्य, सा न: प्रियसखी, कुवेरभवनान्निवर्त्तमाना, केनापि दानवेन चित्रलेखाद्वितीया अर्द्धपथएव निगृहीता।

(२) ऐशान्या दिशा।

(३) सदृशमिदं सोमवंशसम्भवस्य।

(४) एतस्मिन् हेमकूटशिखरे।

Digitized by Google

सूत। यथाज्ञापयत्यायुष्मान् इति ॥ तथा करोति ॥

राजा ॥ रथवेगं रूपयित्वा ॥ साधु, साधु, अनेन रथवेगेन पूर्व्वप्रस्थितं वैनतेयमप्यासादयेयं।

मम हि।

अग्रे यान्तिरथस्य रेणुपदवीं चूर्णीभवन्नोघना
स्वक्रभ्रान्तिरवान्तरेषु वितनोत्यन्यामिवारावलीं;
चित्तारम्भविनिस्सृतं हयगिरस्यायामवच्चामरं,
यन्मध्ये समवस्थितो ध्वजपटः प्रान्ते च वेगानिलात्।
निष्क्रान्तौ राजा सूतश्च।

सहजन्या। हला, गदो राएसी; ता अहोवि जधा सन्दिट्ठं पदेसं गच्छह्म (१)।

मेनका। सहि, एवं करेह्म (२)।

॥ इति हेमकूटशिखरे नाट्येनाधिरोहन्ति ॥

रम्भा। अवि णाम से राएसी उद्धरे णो हिअअसअं (३)।

मेनका। सहि मा दे संसयो भोदु (४)।

---

(१) सखि, गतो राजर्षिः; तस्मादयमपि यथासन्दिष्टं प्रदेशं गच्छामः।

(२) सखि, एवं कुर्मः।

(३) अपि नाम स राजर्षिरुद्धरेत् नो हृदयसखं।

(४) सखि, मा ते संशयो भवतु।

Digitized by Google

रम्भा। णं दुज्जआ दाणवा (१)।

मेनका। उअत्थिदसंपहारो महेन्दो वि मज्झमलोआ दोसवज्झमाणमाणाविअ तंज्जेव्व विवुधविजआअ सेणामुहे णिओएदि (२)।

रम्भा। सव्वधा विजई भोदु (३)।

मेनका ॥ जणमाचं स्खित्वा॥ हला, समस्सस्सध, समस्सस्सध; एस उल्लसिदहरिणकेदणो तस्स राएसिणो सोमदत्तो रहो दीसदि; ण एसो अकअत्थो पडिणिउत्तस्सदित्ति तक्केमि (४)।

॥ निमित्तं सूचयित्वा अवलोकयन्त्यः स्थिताः॥

॥ ततः प्रविशति रथारूढो राजा सूतश्च, भयनिमीलिताक्षी चित्रलेखादक्षिणहस्तावलम्बिता उर्व्वशी च॥

चित्र। सहि, समस्सस, समस्सस (५)।

---

(१) ननु दुर्जया दानवाः।

(२) उपस्थितसंप्रहारो महेन्द्रोऽपि मध्यमलोकात् सवज्रमानमानाय्य तमेव विवुधविजयाय सेनामुखे नियोजयति।

(३) सर्व्वथा विजयी भवतु।

(४) सख्यः, समाश्वसिहि, समाश्वसिहि; एष उल्लसितहरिणकेतनस्तस्य राजर्षेः सोमदत्तो रथो दृश्यते; नैषोऽकृतार्थः प्रतिनिवर्त्तिष्यते इति तर्कयामि।

(५) सखि, समाश्वसिहि, समाश्वसिहि।

Digitized by Google

राजा। सुन्दरि, समाश्वसिहि, समाश्वसिहि।

गतं भयं, भीरु, सुरारिसम्भवं; त्रिलोकरक्षी महिमा हि वज्रिणः;
तदेतदुन्मीलय चक्षुरायतं, निशावसाने नलिनीव पङ्कजं।

विच। अम्महे; उवसिदमेत्तसम्भाविदजीविदा अज्जवि संसं एसा ण पडिवज्जदि (१)।

राजा। बलवदत्र ते सखी परिचस्ता।

तथाहि।

मन्दारकुसुमदाम्ना गुरुरस्याः स्तभ्यते हृदयकम्पः,
मुक्तरुच्छ्वसिता मध्ये परिणाहवतीः पयोधरयोः।

विच ॥सकरुणं॥ हला, उव्वसि, पडुवत्थावेहि अत्ताणअं; अणअरा विअ परिहासि (२)।

राजा।

मुञ्चति न तावदस्याभयकम्पः कुसुमकोमलं हृदयं,
सिचयान्तेन कथञ्चित् स्तनमध्योच्छ्वसिना कथितः।

॥ उर्व्वशी प्रत्यागच्छति ॥

---

(१) आश्वस्यं; उच्छ्वसितमात्रसम्भावितजीविता अद्यापि संज्ञां एषा न प्रतिपद्यते।

(२) सखि, उर्व्वशि, पर्य्युपस्थापयात्मानं; अनयरादिव प्रतिभासि।

Digitized by Google

राजा ॥ सहर्षं ॥ चित्रलेखे, दिष्ट्या वर्द्धसे; प्रकृतिमापन्ना ते प्रियसखी। पश्य।

आविर्भूते ग्रसिनि तमसा रिक्ष्यमाणेव रात्रि,
नैशस्यार्चिर्ऊर्ज्जितभुजदव क्षिप्तभूयिष्ठधूमा;
मोहेनान्तर्व्वरतनुरियं लक्ष्यते मुह्यमाना,
गङ्गा रोधःपतनकलुषा मङ्क्तीव प्रसादं।

चित्र। हला, उव्वसि, विस्सत्था होहि, आवन्नानुकम्पिणा महाराएण पराहदा खु दे चिदग्गपरिवन्थिणो हदाग्गा दाणवा(१)।

उर्व्व॥ उन्मील्य चक्षुषी॥ किम्वा सम्प्रहारदर्शिना महेन्द्रेण अभ्युपपन्नास्मि (२)।

चित्र। ण महेन्द्रेण; महेन्द्रसदृशानुभावेण राएसिणा पुरूरवसेण (३)

उर्व्व ॥ राजानमवलोक्यात्मगतं॥ उपकृतं खलु मे दानवेन्द्रसभ्रमेण (४)।

---

(१) सखि, उर्व्वशि, विस्रब्धा भव, आपन्नानुकम्पिना महाराजेन पराहताः खलु ते चिदग्रपरिपन्थिनो हताग्रादानवाः।

(२) संप्रहारदर्शिना महेन्द्रेण अभ्युपपन्नास्मि।

(३) न महेन्द्रेण; महेन्द्रसदृशानुभावेन राजर्षिणा पुरूरवसा।

(४) उपकृतं खलु मे दानवेन्द्रसभ्रमेण।

Digitized by Google

राजा ॥ उर्व्वशीं विलोक्यात्मगतं॥ स्थाने, खलु, नारायण ऋषिं विलोभयन्त्यऊरुसम्भवामिमां विलोक्य व्रीडिताः सर्व्वाः अप्सरसः; अथवा, नेयं तपस्विनः सृष्टिरित्यवैमि। कुतः।

अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रोनु कान्तिप्रदः,
शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।
वेदाभ्यासजडः कथन्नु विषयव्यावृत्तकौतूहलो
निर्म्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणोमुनिः?

उर्व्व। हला, चित्तलेहे, सहीअणो कहिं क्खु भवे (१)।

चित्र। अभअप्पदादू महाराओ जाणादि (२)।

राजा ॥ उर्व्वशीं विलोक्य॥ महति विषादे वर्त्तते ते सखीजनः, पश्यतु भवती;

यद्दृच्छया त्वं सदृशप्रबन्धयोः
पथि स्थिता, सुन्दरि, यस्य नेत्रयोः,
त्वया विना सोऽपि समुत्सुकोभवेत्;
सखीजनस्ते किमु रूढसौहृदः।

उर्व्व॥ आत्मगतं॥ अभिन्नं क्खु दे वअणं, अधवा, चन्दादो

---

(२) सखि, चित्रलेखे, सखीजनः क्व खलु भवेत्।

(३) अभयप्रदायी महाराजो जानाति।

Digitized by Google

अमिअन्ति, किं एत्थ अच्चरीअं ॥ प्रकाशं ॥ अदो ज्जेव मे तुरवदि हिअअं (१)।

राजा ॥ हस्तेन दर्शयन् ॥

एताः सुतनु मुखं ते सख्यः पश्यन्ति हेमकूटगताः,
उत्सुकनयनालोकास्वभ्रमिवोपस्रवान्मुक्तं।

उर्व्व ॥ साभिलाषं पश्यति ॥

चित्र। हला, किं मां पेक्खसि? (२)।

उर्व्व। समदुःखसुखो पीवीअदि लोचनेहिं (३)।

चित्र ॥ सस्मितं ॥ अइ को? (४)

उर्व्व। णं पणइजणो (५)।

रम्भा ॥ सहर्षमवलोक्य ॥ हला, एसो चित्तलेहादुदिअं पिअसहीं उव्वसीं गेण्हिअ, विसाहासहिदो विअ भअवं सोमो, उवट्ठिदो सो राएसी (६)।

---

(१) अमृतं खलु ते वचनं अथवा चन्द्रतोऽमृतमिति किमत्राश्चर्य्यं! अतएव मे त्वरते हृदयं।

(२) सखि, किं मां पश्यसि?

(३) समदुःखसुखः पीयते लोचनैः।

(४) अयि कः?

(५) ननु प्रणयिजनः।

(६) सखि, एष चित्रलेखादितीयां प्रियसखीमुर्व्वशीं गृहीत्वा विशाखासहितइव भगवान् सोमः, उपस्थितः स राजर्षिः।

Digitized by Google

मेनका ॥ निर्व्वर्ण्य ॥ हला, दुवेवि एत्थ पिअ उवगदा जं सही पच्चाणीदा, जं च अपरिक्खद सरीरो राएसी दीसदि (१)।

सहजन्या। सहि, तुमं भणासि, दुज्जओ दानवोत्ति (२)।

राजा। सूत, दृढमच्छैत्सीन्निखरमवतारय रथं।

सूतः। यथाज्ञापयत्यायुष्मान्॥ इति तथा करोति॥

उर्व्वी॥रथावतारक्षोभं नाटयन्ती सत्रासं राजानमवलम्बते॥

राजा ॥ स्वगतं॥ हन्त हन्त, सफलो, मे, विषयावतारः,

यदिदं रथसंक्षोभादङ्गेनाङ्गं ममार्पयतेक्षणया,

स्पृष्टं सरोमकण्टकमङ्कुरितं मनसिजेनेव।

उर्व्वी ॥ सव्रीडा॥ हला, किञ्चिदवरदो ओसर (३)।

चित्र। णाहं णाहं सक्का (४)।

रम्भा। एवं पिअआरिणं सक्कावेन्ति राइसिं (५)।

अप्सरसः। एवं करेन्ति (६)।

---

(१) सखि, द्वे अपि अत्र प्रिये उपगते यत् सखी प्रत्यानीता, यत्तापरिचितशरीरो राजर्षिर्दृश्यते।

(२) सखि, त्वं भणसि, दुर्जयोदानवइति।

(३) सखि, किञ्चिदपरतोऽपसर।

(४) नाहं नाहं शक्ता।

(५) एवं प्रियकारिणं सक्कावयामो राजर्षिं।

(६) एवं कुर्मः।

Digitized by Google

॥ इत्युपसर्पन्ति ॥

राजा। सूत, उपक्षेपय रथं।

यावत्पुनरियं सुभ्रूरुत्सुकाभिः समुत्सुका,
सखीभिर्य्याति सम्पर्कं सताभिः श्रीरिवार्त्तवी।

सूतः ॥ तथेति रथं क्षापयति ॥

अप्सरसः। दिट्ठिआ महाराओ विजएण वड्ढदि (१)।

राजा। भवत्यश्च सखीसमागमेन।

उर्व्वं ॥ चिन्तेखादन्तहस्तावलम्बा रथादवतीर्य्य ॥ हला, वलिअं परिस्सअध, ण क्खु मे आसि आसंसो जधा पुणोवि सही अणं पेक्खिस्सं (२)।

॥ सख्यः परिष्वजन्ते ॥

मेनका ॥ सागदं ॥ सव्वधा महाराओ पुहवीं पालयन्तो भोदु (३)।

सूतः। आयुष्मन्, महता रथवंशेनोद्वर्हितं,
अथश्च गगणात्कोऽपि तप्तचामीकराङ्गदः,
अभिरोहति शैलाग्रं तडिल्लानिव तोयदः ॥

---

(१) दिष्ट्या महाराजो विजयेन वर्द्धते।

(२) सखि वलितं परिष्वजस्व, न खलु मे आसीदाशंसा यथा पुनरपि सखीजनं प्रेक्षिष्ये।

३) सर्व्वथा महाराजः पृथिवीं पालयन् भवतु।

Digitized by Google

अप्सरसः। अम्भो; चित्तरथो (१)।

॥ ततः प्रविशति चित्ररथः ॥

चित्र ॥ राजानमुपसृत्य ॥ दिष्ट्या महोपकारपर्य्याप्तेन विक्रममहिम्ना वर्द्धसे।

राजा। अये गन्धर्व्वराज ॥ रथादवतीर्य्य ॥ स्वागतं प्रिय सुहृदे॥ अन्योन्यं हस्तं स्पृशतः॥

चित्र। वयस्य, केशिनापहृतामुर्व्वशीमुपश्रुत्य, प्रत्याहरणार्थमस्माः मघवतुना गन्धर्व्वसेनाः समादिष्टाः। अनन्तरं विमानचारिभ्यस्त्वदीयं

यत्नो राज्ञिमुपश्रुत्य त्वामिहस्थमुपागतः,
भवानिमां समादाय महेन्द्रं द्रष्टुमर्हति।

महत् खलु त्वया तत्प्रियमनुष्ठितं; पश्य,

पुरा नारायणेनेयमभिसृष्टा मरुत्वतः,
दैत्यहस्तादवाप्तेव सुहृदा सख्यति त्वया।

राजा। सखे, मा एवं।

ननु वज्रिणएव वीर्य्यमेतद्विजयन्ते द्विषतोयदस्य पक्षाः,
वसुधाधरकन्दरानिषण्णो प्रतिशब्देोदधि हरेर्हिनस्ति नागान्।

चित्र। युक्तमनुत्सुकता खलु विक्रमालङ्कारः।

राजा। सखे, नायमवसरः मघवतुं द्रष्टुं, अतस्त्वमेवाच भवतीं प्रभोरन्तिकं प्रापय।

---

(१) आस्यर्य्यं; चित्ररथः।

Digitized by Google

चित्र। यथा भवान्मन्यते, दूतदूतोभवत्यदूति॥ सर्व्वाः प्रस्थिताः॥

उर्व्व॥ जनान्तिकं॥ हला चित्तलेहे, उअआरिणं राएसिं ण सक्कणोमि आमन्तिदुं, ता तुमं मे मुहं होहि (१)।

चित्र॥ राजानमुपसृत्य॥ महाराअ, उव्वसी विण्णवेदि, महाराएण अणुणादा इच्छामि पिअमिअ महाराअस्स कित्तिअं सुरलोअं णेदुं (२)।

राजा। गम्यतां पुनर्दर्शनायेति॥ सर्व्वाः सगन्धर्व्वा आकाश यानं रूपयन्ति॥

उर्व्व॥ उत्पतनभङ्गं रूपयित्वा॥ अज्जो; लदाविडवे एआवली वैजयन्तिआ मे लग्गा (३)।

॥ सव्याजमुपसृत्य राजानं पश्यति॥ सहि चित्तलेहे, मोआवेहि दाव णं (४)

---

(१) सखि चित्रलेखे, उपकारिणं राजर्षिं न शक्नोमि आमन्त्रितुं, तस्मात् त्वं मे मुखं भव।

(२) महाराज, उर्वशी विज्ञापयति, महाराजेनाभ्यनुज्ञाता इच्छामि प्रियामिव महाराजस्य कीर्त्तिं सुरलोकं नेतुं।

(३) आर्य्य! लताविटपैनैकावली वैजयन्तिका मे लग्ना।

(४) सखि चित्रलेखे, मोचय तावदेनां।

Digitized by Google

चित्र ॥ विलोक्य विहस्य च ॥ अं, अइ दुढं क्खु लग्गा, ण सक्कणोमि मोआविदुं (१)।

उर्व्व। अलं परिहासेण, मोआवेहि दाव णं (२)।

चित्र। अं दुम्मोआविअ मे पडिहाअदि; तधावि मोआविस्सं दाव (३)।

उर्व्व ॥ स्मितं कृत्वा ॥ पिअसहि, सुमरेसि क्खु एदं अत्तणो वअणं (४)।

राजा।

प्रियमाचरितं सते, त्वया, मे गमनेऽस्याः क्षणविघ्नमाचरन्त्या, यदियं पुनरप्यराजनेत्रा परिवृत्तार्द्धमुखी मयाद्य दृष्टा।

चित्र ॥ मोचयति ॥

उर्व्व ॥ राजानमवलोकयन्ती सनिश्वासं सखीजनमुत्प तन्तं पश्यति ॥

सूतः। आयुष्मन्;

---

(१) अयि दृढं खलु लग्ना, न शक्नोमि मोचयितुं।

(२) अलं परिहासेन, मोचय तावदेनां।

(३) अं, दुर्मोच्येव मे प्रतिभाति, तथापि मोचयिष्यामि तावत्।

(४) प्रियसखि, स्मरसि खल्विदं आत्मनो वचनं।

Digitized by Google

अधः सुरेन्द्रस्य कृतापराधान्,
प्रक्षिप्य दैत्यान् सवधानुरास्रौ,
वायव्यमस्त्रं शरधिं पुनस्ते,
महोरगः स्वभ्रमिव प्रविष्टं ।

राजा । तेन हि उपस्थापय रथं, यावदभिरुहामि ।

सूतः ॥ तथा करोति ॥

राजा ॥ नाट्येनाभिरोहति ॥

उर्व्वशी ॥ सस्पृहं राजानमवलोकयन्ती ॥ अपि नाम पुणोवि उअआरिणं एदं पेक्खिस्सं (१)।

॥ इति सगन्धर्व्वा सह सखीभिर्निष्क्रान्ता ॥

राजा ॥ उर्व्वशीवर्त्मोन्मुखः॥ अहो दुर्लभाभिलाषी मदनः ।

एषा मनोमे प्रसभं शरीरात्, पितुः पदं मध्यममुत्पतन्ती,
सुराङ्गनाकर्षति खण्डिताग्रात्, सूत्रं मृणालादिव राजहंसी।

॥ इति निष्क्रान्ताः सर्व्वे ।

इति प्रथमोऽङ्कः ॥

---

(१) अपि नाम पुनरपि उपकारिणं एतं प्रेक्षिष्ये।

इति विक्रमोर्व्वश्याः प्रथमाङ्कविवृतिः ॥

Digitized by Google

॥ अथ द्वितीयोऽङ्कः ॥

ततः प्रविशति विदूषकः।

विदू। अविद, अविद, भो णिमन्तणअ, परमत्थेण विअ राअरहस्सेण फुट्टमाणेण ण सक्कणोमि जणाइण्णे अत्तणो जीहं धारिदुं; ता जाव सो राआ धम्मासणगदो भवे, दाव इमस्सिं विरअणसमद्दे देवच्छन्दप्पासादे अविरुद्धिअ चिट्ठिस्सं (१)।

॥ परिक्रम्योपविश्य, पाणिभ्यां मुखं पिधाय, स्थितः ॥

ततः प्रविशति चेटी।

चेटी। आणत्तम्हि, देवीए काशिराजदुहिदाए, जधा हञ्जे णिउणिए, जदोपउदि भअवदो सुज्जस्स उअत्थानं कदुअ, पडिणिउत्तो महाराओ, तदोपउदि सुद्धन्तिअओ विअ खक्खीअदि, ता, तुमम्पि दाव अज्ज माणवआदो जाणाहि से उक्कण्ठाकारणंत्ति। ता कधं सो वल्लवन्धू आअत्तिदव्वो; अधवा तिणलग्गम्मि अ ओसाअसलिलं ण तस्सिं राअरहस्सं चिरं

(१.) सम्भ्रमे; भोनिमन्त्रणक, परमार्थेनेव राजरहस्येन स्फुटमानेन न शक्नोमि जनाकीर्णे आत्मनोजिह्वां धारयितुं; तत् यावत् स राजा धर्मासनगतोभवेत्, तावत् अमुष्मिन् विरचनसमर्द्दे देवच्छन्दप्रासादे अविरुद्ध स्थास्यामि।

Digitized by Google

चिट्ठिस्सदित्ति तक्केमि, ता जाव णं अप्पेसामि॥ परिक्रम्य दृष्ट्वा॥ अज्जे! आलेक्खवाणरो विअ, किम्पि किम्पि मन्तयन्तो णिज्झुदो अज्ज माणवओ चिट्ठदि; ता जाव णं उपसप्पामि॥ उपसृत्य॥ अज्ज, वन्दामि (१)।

विदू। सेत्थि भोदीए॥ स्वगतं॥ एदं दुट्ठचेलिअं पेक्खिअ, तं राअरहस्सं हिअअं भिन्दिअ, णिक्कमदिविअ॥ किञ्चिन्मुखं सम्वृत्य॥ प्रकाशं॥ भोदि णिउणिए, सङ्गीतवावारं उज्झिअ, कहिं पउत्तासि (२)।

---

(१) आज्ञप्तास्मि, देव्या काशिराजदुहित्रा, यथा सखि निपुणिके, यतः प्रभृति भगवतः सूर्य्यस्योपस्थानं कृत्वा, प्रतिनिवृत्तो महाराजः, ततः प्रभृति शून्यहृदयइव लक्ष्यते; तस्मात्त्वमपि आर्य्यमाणवकात् जानीहि, तस्योत्कण्ठाकारणमिति। तत्कथं स ब्रह्मबन्धुरभ्यर्थितव्यः, अथवा तृणलग्नमिव अवश्यायसलिलं न तस्मिन् राजरहस्यं चिरं स्थास्यतीति, तत् यावदेनमन्वेषयामि। आर्य्ये! आलेख्यवानरइव किमपि किमपि मन्त्रयन् निह्नुतआर्य्यमाणवकस्तिष्ठति; तद्यावदेनमुपसर्पामि। आर्य्य, वन्दे।

(२) स्वस्ति भवत्याः। एतां दुष्टचेटिकां प्रेक्ष्य, तत् राजरहस्यं हृदयं भित्त्वा, निष्क्रामतीव। भवति निपुणिके, सङ्गीतव्यापारमुज्झित्वा, कुत्र प्रवृत्तासि।

Digitized by Google

चेटी। देवीए वअणेण अज्जं व्वेव पेक्खिदुं (१)।

विदू। किं तत्थभोदी आणवेदि? (२)।

चेटी। देवी भणादि जधा, अज्जस्स मम उअरि अदक्खिण्णं, ण मं अणुभूअवेअणं दुक्खिदं अवलोअदित्ति (३)।

विदू। णिउणिए, किमवा पिअवअस्सेण पलिऊलं किम्पि समाअरिदं? (४)।

चेटी। जन्निमित्तं उण भट्टा उक्कण्ठिदो, ताए इत्थिए णामेण भट्टिणा देवी आणविदा (५)।

विदू॥ स्वगतं॥ कधं सअंज्जेव तत्थभअदा वअस्सेण रह स्समेओ कओ, किं दाणिं अहं वअणीओ जोहां रक्खिदुं समत्थोह्मि? ॥ प्रकाशं॥ अं, तत्थभोदी उव्वसित्ति अच्छरा; ताए दंसणेण

---

(१) देव्यावचनेन आर्य्यमेव प्रेक्षितुं।

(२) किं तत्रभवती आज्ञापयति?

(३) देवी भणति यथा, आर्य्यस्य ममोपरि अदाक्षिण्यं, न मामनुभूतवेदनां दुःखितामवलोकयतीति।

(४) निपुणिके, किमवा प्रियवयस्येन प्रतिकूलं किमपि समाचरितं?

(५) यन्निमित्तं पुनर्भर्त्ता उत्कण्ठितः, तस्या स्त्रिया नाम्ना भर्त्ता देवी आज्ञप्ता।

Digitized by Google

उम्मादिदेण केवलं तं आआसेदि, मन्पि बम्हणं अधिदव्वविमुहं दढं पीलेदि (१)।

चेटी॥ स्वगतं॥ उव्वादिदेमए भेओ भट्टिणो रहस्स दुग्गस्स; ता गदुअ, देवीए एदं णिवेदेमि (२)।

॥ प्रस्थिता॥

विदू। णिउणिए, विण्णवेहि मम वअणेण काशिराअदुहिदरं; परिस्सन्तम्हि इमाए मिअतिण्हाए पिअवअस्सं णिअत्ता वेदुं; जदि भोदीए मुहकमलं पेक्खिस्सदि, तदो णिअत्तिस्सदित्ति (३)।

चेटी। जं अज्जो आणवेदि (४)॥ इति निष्क्रान्ता॥

---

(१) कथं स्वयमेव तत्रभवता वयस्येन रहस्यभेदः कृतः, किमिदानीमहं ब्राह्मणी जिह्वां रचितुं समर्थोऽस्मि? । आं, तत्र भवती उर्व्वशीति अप्सरा; तस्यादर्शनेन उन्मादितोऽयं केवलं मामायासयति, मामपि ब्राह्मणं अधिष्ठितव्यविमुखं दृढं पीडयति।

(२) उपपादितोमया भेदोभर्त्तूरहस्यदुर्गस्य, तस्मादृत्वा देव्यै इदं निवेदयामि।

(३) निपुणिके, विज्ञापय मम वचनेन काशिराजदुहितरं; परिश्रान्तोऽस्मि अमुष्यामृगतृष्णायाः प्रियवयस्यं निवर्त्तयितुं; यदि भवत्या मुखकमलं प्रेक्षिष्यते, तदा निवर्त्तिष्यते इति।

(४) यदार्य्यआज्ञापयति।

Digitized by Google

नेपथ्ये ॥ वैतालिकः पठति ॥ जयति जयति देवः ।

आलोकान्तप्रतिहततमो वृत्तिरासां प्रजानां,
तुल्योद्योगस्तव च सवितुश्चाधिकारो मतोनः;
तिष्ठत्येकः क्षणमधिपतिर्ज्योतिषां व्योममध्ये,
षष्ठे काले त्वमसि सभसे देव विश्रान्तिमङ्कः ।

विदू ॥ कर्णं दत्वा ॥ एसोउण पिअवअस्सो धम्मासणादो समुत्थिदो, दूअज्जेव आअच्छदि; ता जाव पासपरिवत्ती होमि (१) ॥ इति निष्क्रान्तः; प्रवेशकः ॥

ततः प्रविशत्युत्कण्ठितो राजा विदूषकश्च ।

राजा ।

आदर्शनात्प्रविष्टा सा मे सुरलोकसुन्दरी हृदयं,
बाणेन मकरकेतोः कृतमार्गमबन्ध्यपातेन ।

विदू । सपीडा खलु जादा तत्थभोदी कासिराअधीदा (२) ।

राजा ॥ निरूप्य ॥ वक्ष्यते भवता रहस्यविक्षेपः ।

---

(१) एष पुनः प्रियवयस्योधर्म्मासनात्समुत्थितः, दूतएवागच्छति; तत् यावत्पार्श्वपरिवर्त्ती भवामि ।

(२) सपीडा खलु जाता तत्रभवती काशिराजदुहिता ।

Digitized by Google

विदू॥ आत्मगतं॥ वञ्चिदम्हि दासीए धीदाए णिउणिआए; अण्णधा कधम्मिअ संपुच्छदि वअस्सो (१)।

राजा। किं भवान् तूष्णीमास्ते?

विदू। भो, एवं मए जीहा संजन्तिदा, जेण भवदोवि णत्थि पडिवअणं (२)।

राजा। युक्तं; अथ केनेदानीमात्मानं विनोदयामि?

विदू। भो, महाणसं गच्छम्ह (३)।

राजा। किं तत्र?

विदू। तहिं पञ्चविहस्स अभ्भवहारस्स उत्तमण्णसम्भारस्स भोअणं मोअअसक्करपप्पलेहिं उक्कण्ठं विणोदेदु (४)।

---

(१) वञ्चितोऽस्मि दास्याः पुत्र्या निपुणिकया; अन्यथा कथमिव संप्रच्छति वयस्यः।

(२) भो, एवं मया जिह्वा संयन्त्रिता, येन भवतोऽपि नास्ति प्रतिवचनं।

(३) भो, महानसं गच्छामः।

(४) तत्र पञ्चविधस्य अभ्यवहारस्य उत्तमान्नसम्भारस्य भोजनं मोदकशर्करा पृष्टकैरुत्कण्ठां विनोदयतु।

Digitized by Google

राजा। तच्चेष्टितरसंविधानात् भवता रंस्यते, मया कथमसुलभप्रार्थयितव्यात्मा विनोदयितव्यः?

विदू। णं भणामि, तत्थभोदीए दंसणपधं गदो (१)।

राजा। ततः किं?

विदू। ण क्खु दे दुल्लहत्ति तक्केमि (२)।

राजा। पक्षपातोऽपि तस्यारूपस्यासौकिकएव।

विदू। एवं वट्टदि कोदूहलं, किं दाव तत्थभोदीए उव्वसीए रूएण अहंज्जेव दुदिओ निरूपिदो (३)।

राजा। प्रत्यवयववर्णना तु न क्षता मयेति; तेन हि श्रूयतां समासतः।

विदू। भो, अवहिदोम्हि (४)।

राजा। वयस्य;

आभरणस्याभरणं, प्रसाधनविधेः प्रसाधनविशेषः,
उपमानस्यापि, सखे, प्रत्युपमानं वपुस्तस्याः।

---

(१) ननु भणामि, तत्रभवत्यादर्शनपथं गतः।

(२) न खलु ते दुर्लभेति तर्कयामि।

(३)। एवं वर्त्तते कौतूहलं, किं तावत् तत्रभवत्या उर्व्वश्यारूपेणाहमेव द्वितीयोनिरूपितः।

(४) भो, अवहितोऽस्मि।

Digitized by Google

विदू। दृदंदाव मिअतिण्हा रसाहिलाषिणा, चाँदएण विअ दिव्वरसाहिलाषिणा, भवदा चारुरूअत्तणं परिग्गहिदं (१)।

राजा। वयस्य, विविधमिश्रिरोपचारान्नान्यच्छरणमस्ति, तद्गच्छान् प्रमदवनमार्गमादेशयतु।

विदू। का गदी दूदो भवे? (२)॥ इति परिक्रामतः॥

विदू। एसो पमदवणपरिसरो, अणालविअ, पत्तुवगतो भवे, आगन्तुणा दक्खिणमारुएण (३)।

राजा। उपपन्नं विशेषणमस्य वायोः। अयंहि।

निषिञ्चन्माधवीं लक्ष्मीं, लतां कौन्दीञ्च लासयन्,
स्नेहदाक्षिण्ययोर्योगात्कामीव प्रतिभाति मे।

विदू। दूजिसोज्जेव अहिणिवेसो भोदु॥ परिक्रामन्॥ पमदवणं पविसदु भवं (४)।

---

(१) दृदं तावन्मृगतृष्णारसाभिलाषिणा चन्द्रेणेव दिव्य रसाभिलाषिणा भवता चारुरूपत्वं परिगृहीतं।

(२) का गतिरितोभवेत्।

(३) एष प्रमदवनपरिसरः, अनालप्य, प्रत्युपगतोभवेत, आगन्तुना दक्षिणमारुतेन।

(४) दृष्टमेवाभिनिवेशोभवतु। प्रमदवनं प्रविशतु भवान्।

Digitized by Google

राजा। वयस्य, प्रविशावतः॥ उभौ प्रवेश नाटयतः॥

राजा॥ चारं रूपयित्वा॥ वयस्य, साधु मनसा समर्थितं आप्त प्रतीकारः, किल ममोद्यानप्रवेशदृति, तच्चान्यथैवोपपन्नं।

विविक्तोर्यदिदं नूनमुद्यानं नाद्य शान्तये,
स्रोतसेवोह्यमानस्य प्रतीपतरणं महत्।

विदू। कथमिव (१)।

राजा। दृढमसुलभवस्तुप्रार्थनादुर्निवारं,
प्रथममपि मनो मे पञ्चबाणः क्षिणोति;
किमुत मलयवातोन्मूलितापाण्डुपत्रै
रुपवनसहकारैर्दर्शितेष्वङ्कुरेषु।

विदू। अलं भवतोपरिदेविदेन, अचिरेण दृष्टिदोषस्स दृढओको अणङ्गोज्जेव दे सहाओ भविस्सदित्ति (२)।

राजा। प्रतिगृहीतं ब्राह्मणवचनं॥ इति परिक्रामतः॥

---

(१) कथमिव।

(२) अलं भवतः परिदेवितेन, अचिरेण दृष्टदोषादृढतरशोकोऽनङ्गएव ते सहायो भविष्यतीति।

Digitized by Google

विदू। पेक्खदु पेक्खदु भवं, वसन्तावदारसूचिदस्स अहि रामत्तणं पमदवणस्स (१)।

राजा। ननु प्रतिपदमेव तावदवलोकयामि। अयि;

अये स्त्रीनखपाटलं कुरुवकं श्यामं दयोर्भागयो,
र्वालाशोकमुपोढरागसुलभं भेदोमुखं तिष्ठति;
दूषद्धूरजःकषायकपिशा चूते नवा मञ्जरी,
मुग्धलस्य च यौवनस्य च सखे मध्ये मधुश्रीः स्थिता।

विदू। भो, एसो कसणमणिसिलावट्टसणाहो माहवीलदा मण्डओ, भमरसंघपअविहडिदेहिं कुसुमेहिं कदोवआरो विअ अत्तभवदो वट्टदि, ता अणुगाहीअदु एसो (२)।

राजा। यदभिरोचते भवते॥ इत्युपविशतः॥

विदू। ता दाणिं दूहासीणो, ललिदलदालोहमाणलोअणो, उव्वसीगदं उक्कण्ठं विणोदेदु भवं (३)।

---

(१) प्रेक्षतां प्रेक्षतां भवान्, वसन्तावतारसूचितस्याभि रामत्वं प्रमदवनस्य।

(२) भो, एष कृष्णमणिशिलापट्टसनाथोमाधवीलता मण्डपो, भ्रमरसंघपदविघटितैः कुसुमैः कृतोपचार इव अत्र भवतोवर्त्तते, तस्मादनुगृह्यतामेषः।

(३) तदिदानीं दूरासीनो ललितलताालोभमानलोचन उर्व्वशीगतां उत्कण्ठां विनोदयतु, भवान्।

Digitized by Google

राजा॥ निश्चम्य॥

वज्रकुसुमिताखपि, सखे, नोपवनलतासु रम्यविटपासु
चक्षुर्म्भाति धृतिं. तदङ्गमाखोकदुर्ल्लक्षितं।
तदुपायचिन्त्यतां।

विदू॥ चिन्तयति॥ एस चिन्तेमि, सा उण परिदेविदेहिं समाधिं भञ्जिअ इस्सदि॥ निमित्तं सूचयित्वा; आत्मगतं॥ अहो, अहं कज्जदंसी (१)।

राजा।

असुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितं;
अभिमुखीभ्विव वाञ्छितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः॥
॥ इति मदनोत्सुकस्तिष्ठति॥

ततः प्रविश्यात्काशयानेनोर्व्वशी चित्रलेखा च।

चित्र। सहि उव्वसि, कहिं क्खु अणिद्दिट्ठकारणं गच्छी अदि?(२)

उर्व्वी॥ मदनवेदनामभिनीय, सलज्जं॥ सहि, हेमकूडसि हरे सदाविडवे सम्मं वैजयन्तिअं मोआवेहित्ति मए भणिदा,

---

(१) एष चिन्तयामि सा पुनः परिदेवितैः समाधिं भंक्ष्यति। अहो, अहं कार्य्यदर्शी।

(२) सखि उर्व्वशि, कुत्र खलु अनिर्द्दिष्टकारणं गम्यते?

Digitized by Google

उअ॒ह॒सिअ॒ मं॑ भणासि, दृढं॑ खु॑ जम्मा॑ ण॑ सक्का॑ मोदु॑दुं॑; दाणिं॑ पु॒च्छ॒सि॑ कहिं॑ अ॒णि॑हि॒ट्ठ॒कारणं॑ ग॒च्छी॑अ॒दि॑? (१)

चित्र। किंनु खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि? (२)

उर्व्व। एसो सो अगणिदलज्जो ववसाओ (३)।

चित्र। कोउण सहीए पढमं तहिं पेसिदो? (४)

उर्व्व। णं हिअओ (५)।

चित्र। तधावि सम्पधारीअदु दाव? (६)

उर्व्व। मअणो खु णिओएदि; मं कुदो सम्पधारणा? (७)

---

(१) सखि, हेमकूटशिखरे सताविटपे लग्नां वैजयन्तिकां मोचयेति मया भणिता, उपहस्य मां भणसि, दृढं खलु लग्ना न शक्या मोचयितुं; इदानीं पृच्छसि, कुत्र अनिर्दिष्टकारणं गम्यते?

(२) किन्न खलु तस्य राजर्षेः पुरूरवसः सकाशं प्रस्थितासि।

(३) एष सोऽगणितलज्जो व्यवसायः।

(४) कः पुनः सखी प्रथमं तत्र प्रेषितः।

(५) ननु हृदयं।

(६) तथापि सम्प्रधार्यतां तावत्।

(७) मदनः खलु नियोजयति, मां कुतः संप्रधारणा।

Digitized by Google

चित्र। अदो अवरं णत्थि मे उत्तरं (१)।

उर्व्व। तेण आदेसेदु मे पिअसही मग्गं, जेण तहिं गच्छन्तीए ण अन्तराओ भवे (२)।

चित्र। वीसत्था होहि, णं भअवदा देवगुरुणा अवराइदा णाम सिद्धाबन्धणी वीज्जा उअदिट्ठा, तेण तिदअपडिपक्खस्स अलंघणीआ कदहा (३)।

उर्व्व। सहि, हिअओ एवं सव्वं जाणादिज्जेव, मम उण तधावि अदिभएण अणिच्चओ (४)॥ उभे भ्रमणं रूपयतः॥

चित्र। सहि, पेक्ख, पेक्ख; एदं भअवदीए भारदीए जमुणा संगमपावणेसुं सलिलेसुं पुणेसुं अवगो अन्तस्स विअ अत्ताणअं,

---

(१) अतोऽपरं नास्ति मे उत्तरं।

(२) तेनादिश्यतु मे प्रियसखी मार्गं, येन तत्र गच्छन्त्या नान्तरायो भवेत्।

(३) विस्रब्धा भव, ननु भगवता देवगुरुणा अपराजिता नाम ग्रिखाबन्धनी विद्या उपदिष्टा, तेन त्रिदशप्रतिपक्षस्य अलंघनीयेङ्गितेत्यः।

(४) सखि हृदयमेवं सर्व्वं जानात्येव, मम पुनस्तथापि अतिभयेनानिश्चयः।

Digitized by Google

पदट्ठाणस्स सिहाभरणभूदं विअ, तस्स राइसिणो भवणमुव गदस्स (१)।

उर्व्व॥ सखीमवलोक्य॥ णं वोत्तव्वं, ठाणन्तरगदो सग्गो त्ति। इला, कहिं सो आवण्णाणुकंपी भवे (२)।

चित्र। एदस्मिं णन्दणवणेक्कपदेसे विअ पमदवणे ओदरिअ जाणिस्सामो (३)॥ उभे अवतरतः॥

चित्र। सहि, एसोपढुमोदिदो विअ भअवं चन्दो कुमुदिं अवेक्खदि तुमं (४)।

उर्व्व। इला, दाणिं पढुमदंसणादोवि सविसेसपिअदंसणो मे महाराओ पडिहाअदि (५)।

---

(१) सखि, पश्य, पश्य; इदं भगवत्याभागीरथ्यायमुना सङ्गमपावनेषु सलिलेषु पुण्येषु अवलोकयतइवात्मानं प्रति ढानस्य शिखाभरणभूतमिव तस्य राजर्षेर्भवनमुपगतस्य।

(२) ननु वक्तव्यं, स्थानान्तरगतः स्वर्गइति। सखि, कुत्र स आपन्नानुकम्पी भवेत्।

(३) एतस्मिन् नन्दनवनैकप्रदेशे इव प्रमदवने अवतीर्य्य स्थास्यामः।

(४) सखि, एष प्रथमोदितइव भगवान् चन्द्रः कौमुदीं अपेक्षते त्वां।

(५) सखि, इदानीं प्रथमदर्शनतोऽपि सविशेषप्रियदर्शनो मे महाराजः प्रतिभाति।

Digitized by Google

चित्र। जुज्जदि, ता एहि, उवसप्पम्ह (१)।

उर्व्व। ण दाव ओअवणिस्सं; तिरक्करिणीपच्छन्ना पासपरिवत्तिणी भविअ, सुणिस्सं दाव, पासपरिवत्तिणा वअस्सेण सह विजणे किं मन्तअन्तो चिट्ठदि! (२)।

चित्र। जधा ते रोअदि (३)।

॥ उभे यथोक्तमनुतिष्ठतः॥

विदू। भो, चिन्तिदो मए दुल्लहपणइजनस्स समागमो वाओ (४)।

उर्व्व। का उण धण्णा दइआ जा इमिणा परिमग्गमाणा अत्ताणअं विणोदेदि? (५)

---

(१) युज्यते, तस्मादेहि, उपसर्पावः।

(२) न तावदुपसर्पिष्यामि; तिरस्करिणीप्रच्छन्ना पार्श्व परिवर्त्तिनी भूत्वा, श्रोष्यामि तावत्, पार्श्वपरिवर्त्तिना वयस्येन सह विजने किं मन्त्रयँस्तिष्ठति।

(३) यथा ते रोचते।

(४) भो, चिन्तितोमया दुर्लभप्रणयिजनस्य समागमोपायः।

(५) का पुनर्धन्या स्त्री या अमुना परिमृग्यमाणा आत्मानं विनोदयति?

Digitized by Google

चित्र। हला, झाणस्स किं विलम्बीअदि? (१)।

उर्व्व। सहि, भीआमि सहसा पहावादो विण्णादुं (२)।

विदू। भो, णं भणामि, चिन्तिदो मए दुल्लहजणसमागमो वाओ (३)।

राजा। वयस्य, कथ्यतां।

विदू। णिविणअसमागमकारिणं णिद्दं सेवदु भवं; अधवा, तत्थभोदीए उव्वसीए पडिकिदिं चित्तफलए अहिलिहिअ, आलोअन्तो अत्ताणअं विणोदेहि (४)।

उर्व्व। सहि, हिअअं समस्सस (५)।

---

(१) सखि, ध्यानाय किं विलम्ब्यते?

(२) सखि, विभेमि खलु सहसा प्रभावात् विज्ञातुं।

(३) ननु भणामि, चिन्तितो मया दुर्लभजनसमागमो वायः।

(४) खप्नसमागमकारिणीं निद्रां सेवतां भवान्, अथवा, तत्रभवत्या उर्व्वश्याः प्रतिकृतिमभिलिख्य चित्रफलके आलोकयन्नात्मानं विनोदय।

(५) सखि, हृदयं समाश्वसिहि।

Digitized by Google

राजा । तदुभयमप्यनुपपन्नं पश्य ।

हृदयमिषुभिः कामस्यान्तः सशल्यमिदं, ततः
कथमुपलभे निद्रां स्वप्ने समागमकारिणीं;
न च सुवदनामालेख्येऽपि प्रियां समवाप्य तां,
मम नयनयोरुद्वाष्पत्वं, सखे, न भविष्यति ।

चित्र । सहि, सुदं तए वअणं (१) ।

उर्व्व । सुदं, ण उण पज्जत्तं हिअअस्स (२) ।

विदू । एत्तिको मे मदिविहवो (३) ।

राजा ॥ निश्वस्य ॥

नितान्तकठिना रुजं मम न वेद या मानसीं,
प्रभावविदितानुरागमवमन्यते चापि सा;
अबद्धफलनीरसं प्रतिनिधाय तस्मिन् जने,
समागममनोरथं; भवतु पञ्चबाणः कृती ।

---

(१) सखि, श्रुतं त्वया वचनं ।

(२) श्रुतं, न पुनः पर्य्याप्तं हृदयस्य ।

(३) एतावान् मे मतिविभवः ।

Digitized by Google

उर्व्व ॥ सखीमवलोक्य ॥ हद्धी, हद्धी! मय्यि एवं अवगच्छदि महाराओ; अहं उण असमत्थम्हि, अग्गदोभविअ, अत्ताणअं दंसिदुं; ता पभावनिम्मिदेण भुज्जवत्तेण लेहं सम्पादिअ, अन्तरा से खिवितुमिच्छामि (१)।

चित्र। अनुमदं मे (२)।

॥ उर्व्वशी नाट्येनाभिलिख्य, क्षिपति ॥

विदू। अविद, अविद! भो, किमेदं! भुअङ्गणिम्मोओ अअं किं मं खादिदुं णिवडिदं (३)।

राजा ॥ दृष्ट्वा ॥ नायं भुजङ्गनिर्म्मोको, भूर्जपत्रगतो ऽय मक्षरविन्यासः।

विदू। णं, अदिट्ठाए उव्वसीए भवदो परिदेविअं सुणिअ, भुज्जवत्ते महानुरागसूअआ अक्खरा अप्पिणिहिअ, विसज्जिआ भवे (४)।

---

(१) हाधिक्, हाधिक्! ममापि एवमवगच्छति महाराजः; अहं पुनरसमर्थास्मि अग्रतोभूत्वात्मानं दर्शयितुं; तस्मात् प्रभावनिर्मितेन भूर्जपत्रेण लेखं सम्पाद्य, अन्तरा अस्य क्षेप्तुमिच्छामि।

(२) अनुमतं मे।

(३) आश्चर्य्यं! भो, किमेष! भुजङ्गनिर्म्मोकः किं मां खादितुं निपतितः?

(४) ननु, अदृष्टया उर्व्वश्या भवतः परिदेवनं श्रुत्वा भूर्जपत्रे

Digitized by Google

राजा ॥ नास्त्यसाध्यं दैवस्य ॥ गृहीता अनुवाक्या, सहर्षं ॥ सखे, उपपन्नस्ते वितर्कः ।

विदू । जं एत्थ अहिलिहिदं, तं सुणिदुमिच्छामि (१)।

उर्व्व । साधु, साधु, अज्ज, नागरोसि (२)।

राजा ॥ श्रूयतां ॥ इति वाचयति ॥ सामिअ, सम्भाविआ जहअहं तए अअलिआ, तहेअ अणुरत्तस्स, सुहअ, एअमेअ तुह । ण वरिण मे ललिअ पारिआअसअणिज्जअम्मि होन्ति सुहा, णन्दणवणवाआ वि सिहि विअ णिअसरीरे (३)।

उर्व्व । किणु, क्खु सम्मदं भणेदि? (४)

महानुरागसूचकान्यक्षराण्यभिलिख्य विसृष्टानि भवेत्।

(१) यदत्राभिलिखितं, तत् श्रोतुमिच्छामि।

(२) आर्य्य, नागरोऽसि।

(३) स्वामिन्, सम्भाविता यथाहं त्वया अङ्गाची तथैवानुरक्तस्य, सुभग, एवमेव तव। अनन्तरञ्च ललितपारिजातशयनीये न मम सुखानि भवन्ति, नन्दनवनवातामपि शिखिन इव निजशरीरे।

(४) किं नु, खलु सम्यगं भणति?

Digitized by Google

चित्र। किमु, भणिदं दुमिणा, ग्राणकमलमालासदिसेहिं अङ्गेहिं? (१)

विदू। दिट्ठिआ मए बुभुक्खिदेण सोत्थिवाअणिअं लद्धं भवदो समस्सासणकारणं (२)।

राजा। समाश्वासनमिति किमुच्यते? पश्य।

मुक्तानुरागपिशुनं लक्षितार्द्रनखं,
पत्रे निवेशितमुदाहरणं प्रियाया:,
उत्पश्यतो मम, सखे, मदिरेक्षणायाः,
लक्ष्मीः समागतमिवाननमार्पितेन।

उर्व्वी। एत्थ णो समविभागा मही (३)।

राजा। वयस्य, अञ्जलिस्थेन मे सुप्यन्ते अक्षराणि, आर्य्यमाज्ञां स्थापयतु निक्षिप: प्रियायाः।

विदू। तदो किं दाणिं तत्थभोदी उव्वसी भवदो मणो रहकुसुमं दंसिअ, फले विसंवददि (४)।

---

(१) किं नु, भणितमनुना स्नानकमलमालासदृशैरङ्गैः।

(२) दिष्ट्या मया बुभुक्षितेन स्वस्तिवाचनिकं लब्धं भवतः समाश्वासकारणं।

(३) अत्रावयोः समविभागा मतिः।

(४) तदा किमिदानीं तत्रभवती उर्व्वशी भवतो मनो रथकुसुमं दर्शयित्वा, फले विसंवदति।

Digitized by Google

उर्व्व। हला, जाव उवत्थाणकादरं अत्ताणअं समत्थावेमि, दाव तुमं अत्ताणअं दंसिअ, जं मे अनुमदं तं भणाहि (१)।

चित्र॥ राजानमुपसृत्य॥ जअदु जअदु, महाराओ (२)।

राजा॥ सभ्रमादगर्व्वं॥ स्वागतं भवत्यै॥ पार्श्वमवलोक्य॥ भद्रे।

न तथा नन्दयसि मां, सखी विरहिता तया;
सङ्गमे दृष्टपूर्व्वेव यमुना गङ्गया यथा।

चित्र। णं, पढमं मेहराइ दीसदि, पच्छा विज्जुलिआ (३)॥

विदू॥ अपवार्य्य॥ कधं ण एसा उव्वसी उवगदा? तत्थ भोदीए सहअरीए एदाए होदव्वं (४)।

राजा। एतदासनमास्यतां।

चित्र॥ उपविश्य॥ उव्वसी, महाराअं सिरसा पणमिअ, विण्णवेदि (५)।

---

(१) सखि, यावदुपस्थानकातरं आत्मानं संस्थापयामि, तावत्त्वमात्मानं दर्शयित्वा, यन्मे अनुमतं तत् भण।

(२) जयतु जयतु, महाराजः।

(३) ननु प्रथमं मेघराजिर्दृश्यते पश्चात् विद्युत्।

(४) कथं न एषा उर्व्वशी उपगता? तत्रभवत्याः सहचर्य्या एतया भवितव्यं।

(५) उर्व्वशी, महाराजं शिरसा प्रणम्य, विज्ञापयति।

Digitized by Google

राजा। किमाज्ञापयति?

चित्र। मम तस्मिं सुरारिसम्भवे दुण्णए महाराओ ज्जेव सरणं आसि, सम्पदं साहं तव दंसणसमुत्थेण आआसिणा वलिअं वाधेअमाणा मअणेण, पुणोवि महाराअस्स अणुकम्पणीया होमि (१)।

राजा। अयि सखि?

पर्य्युत्सुकां कथयसि प्रियदर्शनात्मा
मार्त्तिन्न पश्यसि पुरूरवसस्तदर्थां;
साधारणोऽयमुभयोः प्रणयो; यतस्व,
तन्नेन तन्मनसा घटनाय योग्यं।

चित्र॥ उर्व्वशीमुपेत्य॥ हला, इदो एहि, णिब्भअदरं भीअणं मअणं पेक्खिअ, पिअदमस्स दे दूरट्ठिं सम्वुत्ता (२)।

उर्व्वशी॥ श्लोकात् सकम्पा ससाध्वसा॥

---

(१) मम तस्मिन् सुरारिसम्भवे दुर्णये महाराजएव शरणमासीत्, साम्प्रतं साहं तव दर्शनसमुत्थेनायासिना वलितं बाध्यमाना मदनेन, पुनरपि महाराजस्यानुकम्पनीया भवामि।

(२) सखि, इतएहि, निभृततरं भीषणमदनं प्रेक्ष्य, प्रिय तमस्य ते दूत्यस्मि सम्वृत्ता।

Digitized by Google

अए, अणवत्थिदे लहुं एव्व तए परिच्चत्तास्मि (१)।

चिच ॥ सस्मितं ॥ एदस्मिं मुहुत्ते आणिस्सामो का कं परिच्चइस्सदित्ति; आआरं दाव पडिवज्ज (२)।

उर्व्वशी ॥ ससाध्वसमुपसृत्य, सव्रीडं ॥ जअदु, जअदु, महाराओ (३)।

राजा ॥ सहर्षं ॥ सुन्दरि,

मया नाम जितं यस्य त्वयायं समुदीर्य्यते
जयशब्दः, सहस्राच्चादागतः मुखान्तरं।

॥ हस्ते गृहीत्वा आसने उपवेशयति ॥

विदू। कीदिसी त्थिदी भोदीए? रण्णो पिअवअस्सो वम्हणो ण वन्दीअदि? (४)।

॥ उर्व्वशी सस्मितं प्रणमति ॥

विदू। सोत्थि भोदीए (५)।

---

(१) अयि अनवस्थिते लघु एव त्वया परित्यक्तास्मि।

(२) एतस्मिन् मुहूर्त्ते आस्थामः का कं परित्यक्ष्यतीति; आकारं तावत् प्रतिपद्यस्व।

(३) जयतु जयतु, महाराजः।

(४) कीदृशी स्थितिर्भवत्याः? राज्ञः प्रियवयस्यो ब्राह्मणो न वन्द्यते?

(५) स्वस्ति भवत्याः।

Digitized by Google

॥ नैपथ्ये ॥ देवदूतः ॥ चित्रलेखे त्वरयोर्व्वशीं ।

मुनिना भरतेन यः प्रयोगोभवतीष्वप्सरसामयोनिषद्धुः,
ललिताभिनयं तमद्य भर्त्ता मरुतां द्रष्टुमनाः सलोकपालः ।

॥ सर्व्वे आकर्णयन्ति ॥

॥ उर्व्वशी विषादं निरूपयति ॥

चित्र । सुदं तए देवदूअस्स वअणं ? ता अणुजाणाहि दाव महाराअं (१)।

उर्व्व ॥ निअत्त ॥ णत्थि मे वाम्विहवो (२)।

चित्र । महाराअ, उव्वसी विण्णवेदि, परवसोअअं जनः, महाराएण अणुण्णादा इच्छामि, देअदेअस्स अणवरद्धं अत्ताणअं कादुं (३)

राजा ॥ कथं कथमपि वचनं संस्थाप्य ॥ नहि भवत्यो रीश्वरनियोगहन्त्र्या, किन्तु स्मर्त्तव्यस्त्वयं जनः ।

॥ उर्व्वशी वियोगदुःखं रूपयित्वा, राजानं रूपयन्ती सह सख्या निष्क्रान्ता ॥

---

(१) श्रुतं त्वया देवदूतस्य वचनं ? तस्मादनुज्ञापय तावन्महाराजं ।

(२) नास्ति मे वाग्विभवः ।

(३) महाराज, उर्व्वशी विज्ञापयति, परवशोऽयं जनोमहाराजेनाभ्यनुज्ञाता इच्छामि, देवदेवस्यानपराद्धुमात्मानं कर्त्तुं ।

Digitized by Google

राजा ॥ सनिश्वासं ॥ वैयर्थ्यमिव चक्षुषः सम्प्रति।

विदू ॥ पचं दर्शयितुकामः ॥ णं भुज्ज दत्यद्धोकेनात्मगतं ॥ अविद? अविद, भोः! उव्वसीदंसनविम्हिदेण तं मए भुज्जवत्तं पब्भट्ठंपि हत्तादो ण विण्णादं (१)।

राजा। वयस्य, किमपि वक्तुकामः।

विदू। वअस्स, दद्दम्मि वत्तुकामो; ण भवं अङ्गाइं मुञ्चदु, दढं क्खु तए बद्धुभावा उव्वसी ण सा दतो गदुअ, एदं अणुबन्धं शिढिलीकरिस्सदित्ति (२)।

राजा। ममाप्येतदेव मनसि वर्त्तते, तथा खलु प्रस्थाने;

अनीशया शरीरस्य हृदयं स्ववशं मयि,
स्तनकम्पक्रियालक्ष्यं न्यस्तं निश्वसितैरिव।

विदू ॥ खगतं ॥ वेवदि मे हिअअं, केत्तिअं वेलं तस्स भूज्जवत्तस्स अत्तभवदा वअस्सेण णामं गेण्हिदव्वं त्ति (३)।

---

(१) नन भूर्ज्जं। सभ्रमे, भोः! उर्व्वशीदर्शनविस्मितेन तन्मया भूर्ज्जपत्रं प्रभ्रष्टमपि हस्तान्न विज्ञातं।

(२) वयस्य हृदमस्मि वक्तुकामो; न भवानङ्गानि मुञ्चतु, दृढं खलु त्वयि बद्धुभावा उर्व्वशी न सा हृतोगला, एतमनुबन्धं शिथिलीकरिष्यतीति।

(३) वेपते मे हृदयं, कियतीं वेलां तस्य भूर्ज्जपत्रस्य अत्र भवता वयस्येन नाम गृहीतव्यमिति।

Digitized by Google

राजा। वयस्य, केनेदानीमुन्मनसमात्मानं विनोदयामि?

॥ स्मृत्वा ॥ उपनय भूर्ज्जपत्रं।

विदू ॥ सर्व्वतोदृष्ट्वा सविषादं॥ हा, कथं न दृश्यदि! भो, दिव्वं क्खु तं भुज्जवत्तं गअं क्खु उव्वसीए मग्गेण (१)।

राजा ॥ सास्रुयं॥ सर्व्वत्र प्रमादी वैधेयः।

विदू। णं, विचीअदां॥ उत्थाय॥ दूदो भवे, दूध वा भवे ॥ वञ्चविधं नृत्यति॥ (२)।

॥ ततः प्रविश्यौशीनरी, चेटी च, विभवतश्च परीवारः॥

औशी। हञ्जे णिउणिए, सच्चं खदाघरं वीसन्तो अज्ज माणवअसहाओ दिट्ठो तए महाराओ? (३)

चेटी। अलिअं किं मए भट्टिणी विण्ण विदपुव्वा।

देवी॥ परिक्रम्य, पुरस्तादवलोक्य च॥ णिउणिए, किमेदं पत्तं णवचीरअं विअ दूदो दक्खिणमारुदेण आणीअदि? (४)

---

(१) हा, कथं न दृश्यते? भो, दिव्यं खलु तद्भूर्ज्जपत्रं गतं उर्व्वश्यामार्गेण।

(२) ननु, विचीयतां, दूतोभवेत्, दूह वा भवेत्।

(३) सखि निपुणिके, सत्यं लतागृहं प्रविशन् आर्य्यमाण वकसहायोदृष्टस्त्वया महाराजः?

(४) अलीकं किं मया भर्त्री विज्ञापितपूर्व्वा। निपुणिके, किमेतत्पत्रं नवचीरमिव दूतो दक्षिणमारुतेनानीयते?

Digitized by Google

चेटी ॥ विभाव्य ॥ भट्टिणि, परिवत्तणाविभाविदक्खरं भुज्जवत्तं क्खु एदं; हन्त, कधं देदएव्वेव णेउरपरिलग्गं ॥ गृहीत्वा ॥ णं वाचीअदु (१)।

देवी। णं अवलोएहि दाव, जइ अविरुद्धं तदो सुणिस्सं (२)॥

चेटी ॥ तथा कृत्वा ॥ भट्टिणि, तं व्वेव एदं कोलीणअं विअम्भदि; भट्टारअं उद्दिसिअ, उव्वसीअक्खरअं कव्ववन्धं त्ति तक्केमि; अज्ज, माणवअप्पमादादो अम्हाणं हत्थं आअदं त्ति (३)।

देवी। णं, गहिदत्था होहि (४)।

॥ चेटी वाचयति ॥

देवी। हञ्जे, एदेण व्वेव उवहारेण तं अक्खराकामुअं पेक्खम्ह (५)।

---

(१) भर्चि, परिवर्त्तनाविभावितार्चरं भूर्ज्जपत्रं खलु इदं, हन्त, कथं देव्याएव नूपुरपरिलग्नं। ननु वाचयतैतत्।

(२) ननु अवलोक्य तावदेतत्, यद्यविरुद्धं तदा श्रोष्यामि।

(३) भर्चि, तदेवेदं कौलीन्यं विजृम्भते, राजानमुद्दिश्य, उर्व्वश्युचरकं काव्यबन्धमिति तर्कयामि; आर्य्य माणवक प्रमादात् अस्माकं हस्तमागतमिति।

(४) ननु, गृहीतार्था भव।

(५) सखि, एतेनैवोपहारेण तमक्षरःकामुकं प्रेक्षावहे।

Digitized by Google

चेटी। जं देवी आणवेदि (१)।

राजा। भगवन्, वसन्त सखे, मलयानिल;

वामार्थं हर सम्भृतं सुरभितं पौष्पं रजोवीरुधां,
किं कार्य्यं भवतो हृतेन दयिताश्वेडस्वहस्तेन मे;
जानात्येव भवान् विनोदनप्रतैरेवंविधैर्धारितं,
कामार्त्तं जनमञ्जसाभिभवितुं नालम्बितास्वासनं।

चेटी। देवि, पेक्ख पेक्ख, एदस्स च्चेव भुज्जवत्तस्स अत्थे सणा वट्टदि (२)।

श्रौशी। ता णं पेक्खस्स दाव तुण्हिं चिट्ठ (३)।

विदू। भोः किमु क्खु एदं? उन्मिल्लमाणनीलपङ्कजच्छविणा मउरपिच्छेण विप्पलद्धम्हि (४)।

राजा। सर्व्वथा हतोऽस्मि मन्दभाग्यः!

श्रौशी॥ सहसोपसृत्य,॥ अज्जउत्त, अलं आवेएण, एदं तं भुज्जवत्तं (५)।

---

(१) यद्देवी आज्ञापयति।

(२) पश्य पश्य, एतस्यैव भूर्ज्जपत्रस्यान्वेषणा वर्त्तते।

(३) तस्मान्नन्वु पश्यामः तावत् तूष्णीं तिष्ठ।

(४) किं नु इदं उन्मील्यमाननीलपङ्कजच्छविना मयूरपिच्छेन विप्रलब्धोऽस्मि?

(५) आर्य्यपुत्र, अलमावेगेन, एतत् तत् भूर्ज्जपत्रं।

Digitized by Google

राजा॥ सस्मभ्रममात्मगतं॥ अये देवी॥ सर्वे लक्ष्यं॥ स्वागतं देव्यै।

औशी। दुरागदं दाणिं मे सम्वुत्तं (१)।

राजा॥ जनान्तिकं॥ वयस्य, कथमत्र प्रतिविधेयं?

विदू। लोत्तेण सुइदअस्स कुम्भीलअस्स णत्थि वाआ पलिविधानं (२)।

राजा। नेदं पत्रं मया दृश्यते, तत् खलु मन्त्रपत्रं यदर्थं ममायमारम्भोऽन्वेषणाय।

औशी। जुज्जदु अत्तणो सोहग्गं निगूहिदुं (३)।

विदू। भोदु, तुरवावेहि से भोअणं, जेण पित्तप्पसमणेण सुत्थो भोदि (४)।

औशी। णिउणिए, सोहणंक्खु अणुसासिदो पिअवअस्सवम्हणेण; किं अण्णं अण्णं अम्हत्थदअ आवेसिदो पि जो खिज्जदि (५)।

---

(१) दुरागतमिदानीं मे सम्वृत्तं।

(२) लोभेन सूचितस्य कुम्भीरकस्य नास्ति वाचा प्रतिविधानं।

(३) युज्यते आत्मनः सौभाग्यं निगूहितुं।

(४) भवतु, त्वरयस्व भोजनं, येन पित्तप्रशमनेन सुस्थो भवति।

(५) निपुणिके, शोभनं खलु अनुशासितः प्रियवयस्यो ब्राह्मणेन; किमन्यदन्यदभ्यर्थावेशितोयो खिद्यते॥

Digitized by Google

विदू। णं पेक्ख, सव्वो आस्सासिदो चित्त भो अणेण (१)

राजा। मूर्ख, बलादपराधिनं मामापादयसि।

औशी। णत्थि पभवन्तस्स अवराहो, अहं ज्जेव अत्थ अवरद्धा, जा पलिऊलदंसणा भविअ, अन्नादोभवामि; णिउणिए, दूदो एहि (२)।

॥ इति सकोपं प्रस्थिता ॥

राजा। अपराधीनस्त्वहं; प्रसीद रम्भोरु विरम मंरम्भात्;

सेव्योजनस्य कुपितः कथं नु दासोनिरपराधः।

॥ इति पादयोः पतति ॥

देवी। कितव, लज्जहिअआ क्खु अहं अणुणअंण गेण्हामि, किन्तु दक्खिणस्स दे किदवच्चादावस्स भाआमि (३)।

चेटी। दूदो दूदो देवीत्ति (४)।

॥ राजानमपहाय, सपरिजना निष्क्रान्ता ॥

विदू। पाउसनदीविअ अप्पसण्णा ज्जेव तत्थभोदी गदा, ता उत्थेहि उत्थेहि (५)।

---

(१) ननु पश्य, सर्व्वे आश्वासिताः चिरभोजनेन।

(२) नास्ति प्रभवतोऽपराधः, अहमेवात्रापराद्धा, या प्रति कूलदर्शना भूत्वा, अन्यतोभवामि; निपुणिके, द्रुतमेहि।

(३) कितव, लघुहृदया खल्वहं अनुनयं न गृह्णामि, किन्तु दक्षिणस्य ते कृतपश्चात्तापस्य विभेमि।

(४) द्रुतद्रुतोदेवीति।

(५) वर्षानदीव अप्रसन्नैव तत्रभवती गता; तस्मादुत्तिष्ठोत्तिष्ठ।

Digitized by Google

राजा। वयस्य, नेदमुपपन्नं। पश्य।

प्रियवचनकृतोऽपि योषितां दयितजनानुनयोरसाहते,
प्रविशति हृदयं न तद्विदां, मणिरिव कृत्रिमरागयोजितः।

विदू। अणुकूलं ज्जेव भवदो एदं वअणं; णहि अक्खि दुक्खिदो संमुहे दीवसिहं सहदि (१)।

राजा। मैवं, उर्व्वशीगतमनसोऽपि मम, देव्यां सएव बहुमानः; किन्तु प्रणिपातस्खलनादहमपि तस्यां धैर्य्यमवलम्बिष्ये।

विदू। भो, चिट्ठदु दाव देवीकधा, बुभुक्खिदस्स मे जीविअं अवलम्बदु भवं, समओ क्ख ण्हाणभोअणं सेविदुं (२)।

राजा॥ ऊर्द्धमवलोक्य॥ कथमर्द्धं गतं दिवसस्य, अतः खलु;

उष्णालुः शिशिरे निषीदति तरोर्मूलालवाले शिखी,
निर्भिद्योपरिकर्णिकारकुसुमान्याशेरते षट्पदाः;
तप्तं वारि विहाय तीरनलिनीं कारण्डवः सेवते,
क्रीडावेश्मनिवेशिपञ्जरशुकः स्नात्वा जलं याचते।

॥ इति निष्क्रान्तौ ॥

इति द्वितीयोऽङ्कः।

---

(१) अनुकूलमेव भवतोवचनं; नहि अक्षिदुःखितः सन्मुखे दीपशिखां सहते।

(२) तिष्ठतु तावत् देवीकथा, बुभुक्षितस्य मे जीवितमव लम्बयतु भवान्, समयः खलु स्नानभोजने सेवितुं

इति द्वितीयाङ्कविवृतिः।

Digitized by Google

॥ अथ तृतीयोऽङ्कः ॥

ततः प्रविशतो भरतमिश्रौ।

प्रथमः। सखे, पैलव, अग्निशरणाद्गच्छता महेन्द्रमन्दिरमुपाध्यायेन त्वमासनं ग्राहितः, अहमग्निशरणरक्षार्थं स्थापितः; ततः पृच्छामि, गुरोः प्रयोगेण देवपरिषदाराधिता भवेति?

द्वितीयः। ण जाणे कथं आराधिदा भोदि, तस्मिं उण सरस्सईकिदकव्वबन्धे लक्खीसअम्बरे, उव्वसी तेसु तेसु रसान्तरेसु उम्मादिआ आसि (१)।

प्र। दोषविकाशइति वाक्यशेषः।

द्वि। आं, ताए वअणं क्खलिअं आसि (२)।

प्र। किमिव?

द्वि। लक्खीभूमिआए वत्तमाणा उव्वसी, वारुणीभूमिआए वत्तमाणाए मेणआए, पुच्छिदा, समागता तिलोअपुरिसा, सकेसवा, लोअवाला; कस्सिं दे हिअआहिणिवेसोत्ति? (३)

---

(१) न जाने कथं साराधिता भवति, तस्मिन् पुनः सरस्वतीकृतकाव्यबन्धे लक्ष्मीस्वयम्वरे उर्व्वशी तेषु तेषु रसान्तरेषु उन्मादिता आसीत्?।

(२) आं तस्यावचनं स्खलितमासीत्।

(३) लक्ष्मीभूमिकायां वर्त्तमाना उर्व्वशी, वारुणीभूमिकायां वर्त्तमानया मेनकया, पृष्टा; समागतास्त्रिलोकपुरुषाः सकेशवा लोकपालाः कस्मिंस्ते हृदयाभिनिवेशइति?

Digitized by Google

प्र। ततस्ततः।

द्वि। ताए पुरिसोत्तमेत्ति भणिअव्वे, पुरूरवत्ति णिग्गदा वाणी (१)।

प्र। भवितव्यानुविधायीनि बुद्धीन्द्रियाणि। न तामभिक्रुद्धो मुनिः?

द्वि। अप्पा उअज्झाएण, महेन्देण उण अनुग्गहिदा (२)।

प्र। कथमिव?

द्वि। जेण मम तए उअएसो लंघिदो, तेण ण दे दिव्वं जाणं भविस्सदित्ति, उअज्झाअस्स सआसादो साओ। पुरन्दरेण उण लज्जाओणदमुहिं उव्वसिं पेक्खिअ एवं भणिदं, जस्सिं बद्धु भावासि तुमं तस्स मे रणसहाअस्स राएसिणो पिअं करणीअं, ता तुमं पुरूरवसं जधाकाममुवचिट्ठ, जाव सो परिट्ठिदसन्ताणो भोदित्ति (३)।

---

(१) तया पुरुषोत्तमे इति वक्तव्ये, पुरूरवसीति निर्गता वाणी।

(२) अस्मा उपाध्यायेन महेन्द्रेण पुनरनुगृहीता।

(३) येन मम त्वया उपदेशोलंघितस्तेन न ते दिव्यं ज्ञानं भविष्यतीति उपाध्यायस्य सकाशात् शापः। पुरन्दरेण पुनर्लज्जावनतमुखीमुर्व्वशीं प्रेक्ष्य, एवं भणितं, यस्मिन् बद्धभावासि त्वं तस्य मे रणसहायस्य राजर्षेः प्रियं करणीयं, तस्मात्त्वं पुरूरवसं यथाकाममुपतिष्ठस्व, यावत्स प्रतिष्ठितसन्तानोभवतीति।

Digitized by Google

प्र। सदृशं पुरुषान्तरवेदिनो महेन्द्रस्य।

दि ॥ सूर्य्यमवलोक्य ॥ कथाप्रसङ्गेण अपरद्धा, अभिषेक वेला; ता उपाध्याया अस्य पार्श्वपरिवर्त्तिनी होत्रा (१)।

इति निष्क्रान्तौ। विष्कम्भकः।

॥ ततः प्रविशति कञ्चुकी ॥

कञ्चुकी। सर्व्वः कल्पे वयसि यतते लब्धुमर्थान् कुटुम्बी,
पश्चात्पुत्रैरुपहितभरः कल्पते विश्रमाय;
अस्माकन्तु प्रतिदिनमियं सादयन्ती प्रतिष्ठां,
सेवाकाकुः परिणतिरभूत् स्त्रीषु कष्टोऽधिकारः।

आदिष्टोऽस्मि, सनियमया काशिराजपुत्र्या; यथा व्रतस्नाताय मया मानमुत्सृज्य, निपुणिकामुखेन पूर्व्वं याचितोमहाराजः; तदेवं मद्वचनात् विज्ञापयेति; यावदहमवधितस्नाता कार्य्यं महाराजं पश्यामि॥ परिक्रम्यावलोक्य च॥ रमणीयः किल दिवसावसानवृत्तान्तो राजवेश्मनः।

उत्कीर्णादव वासयष्टिषु निशानिद्रालसावर्हिणो,
धूपैर्जालविनिःसृतैर्व्वलभयः सन्दिग्धपारावताः;
आचारप्रयतः सपुष्पबलिषु स्थानेषु चार्घिमतीः
सन्ध्यामङ्गलदीपिका विभजते मुद्धान्तवृद्धोजनः।

---

(१) कथाप्रसङ्गेनापरद्धा, अभिषेकवेला; तस्मादुपाध्याया यस्य पार्श्वपरिवर्त्तिनी भवावः।

Digitized by Google

॥ अवलोक्य ॥ अये, इतएव प्रस्थितोदेवः। यदेषः।

परिजनवनिताकरार्पिताभिः
परिवृतएष विभाति दीपिकाभिः;
गिरिरिव गतिमानपक्षसाद्या
दनुतटपुष्पितकर्णिकारयष्टिः।

यावदेनमवलोकमार्गे प्रतिपालयामि;

॥ ततः प्रविशति, यथानिर्दिष्टः, सपरिवारोराजा विदूषकश्च॥

राजा ॥ आत्मगतं॥

कार्य्यान्तरितोत्कण्ठं दिनं मया नीतमनतिक्लेशेन;
अविनोददीर्घयामा कथं नु रात्रिर्गमयितव्या।

कञ्चुकी॥ उपगम्य॥ जयति, जयति, देवः। देव, देवी विज्ञापयति; मणिहर्म्यपृष्ठे सुदर्शनस्यक्रस्तस्य सन्निहितेन देवेन प्रतिपालनीयः, यावच्चक्रारोहिणीयोगः।

राजा। विज्ञाप्यतां देवी, यत्सव कन्दतीति।

कञ्चुकी ॥ तथेति निष्क्रान्तः॥

राजा। वयस्य, किमु परमार्थतएव देव्याग्रहनिमित्तोऽयमारम्भः स्यात्?

विदू। तक्केमि, संजातपश्चादावा अत्तभोदी वदव्वदेसेण तत्थभवदो पणिवादसंघणं पमज्जिदुकामत्ति (१)।

---

(१) तर्कयामि, संजातपश्चात्तापा, अत्तभवती अतव्यपदेशेन अत्तभवतः प्रणिपातसङ्घनं प्रमार्ष्टुकामेति।

Digitized by Google

राजा। उपपन्नं भवानाह;

अवधूतप्रणिपाताः, पश्चात्सन्त्यमानमनसोऽपि,
विविधैरनुतप्यन्ते दयितानुनयैर्मनस्विन्यः।
तदादेशय मणिहर्म्यपृष्ठस्य मार्गं।

विदू। इदो, इदो, एदु भवं; इमिणा गङ्गातरङ्गसिसिरेण फलिअमणिसिलासोवाणेण, आरोहदु भवं; सव्वदा रमणीयं मणिहम्मअलं (१)।

॥ राजा आरोहति ॥ सर्व्वे सोपानारोहणं नाटयन्ति ॥

विदू॥ निरूप्य॥ पच्चासण्णेण चन्देण होदव्वं, जधा तिमिरेण रेक्खीयमाणं पुव्वदिसामुहं आलोहिअप्पहं दीसदि (२)।

राजा। सम्यगभवान् मन्यते।

उदयगूढमृगाङ्कमरीचिभिस्तमसि दूरतरं प्रतिसारिते;
अलकसंयमनादिव लोचने, हरति मे हरिवाहनदिङ्मुखं।

विदू। ही ही, भो भो, एसो खण्डमोदअसरिसो उदितो राआ ओसधीणं (३)।

---

(१) इतइत, एतु भवान्; अमुना गङ्गातरङ्गसिसिरेण स्फटिकमणिशिलासोपानेनारोहतु भवान्; सर्व्वदा रमणीयं मणिहर्म्यतलं।

(२) प्रत्यासन्नेन चन्द्रेण भवितव्यं, यथा तिमिरेण रिक्ष्यमानं पूर्व्वदिङ्मुखमालोहितप्रभं दृश्यते।

(३) भो भो, एषखण्डमोदकसदृशउदितोराजा ओषधीनां।

Digitized by Google

राजा ॥ सस्मितं ॥ सर्व्वत्रौदरिकस्याभ्यवहार्य्यमेव विषयः ! ॥ प्राञ्जलिः प्रणिपत्य ॥ भगवन्, ऋचराज ।

रुचिमावहते यतां क्रियायै, सुधया तर्पयते पितॄन् सुरांश्च,
तमसां निधिं मूर्क्षतां निहन्त्रे, हरचूडानिहितात्मने नमस्ते।

विदू । भो, बम्हणसंकामिदक्खरेण पिदामहेण, अब्भणुण्णादोसि; आसणगदो होहि, तेण अहम्पि सुहासीणो होमि (१)।

राजा ॥ विदूषकवचनं परिगृह्योपविष्टः ॥ परिजनं विलोक्य ॥ अनभिव्यक्तास्थिक्रियायां दीपिकाः पुनरुक्ताः, तदिह आस्यन्तु भवत्यः ।

परिजनः । जं देवो आणवेदित्ति । (२) निष्क्रान्तः ।

राजा ॥ चन्द्रमालोक्य विदूषकं प्रति ॥ वयस्य, परं मूर्क्षतो दागमनं देव्यास्तदिविक्ते कथयामि खामवस्थां ।

विदू । भो, णं दीसदिज्जेव एसा उव्वसी, किन्तु ताए सरिसं अणुरागं पेक्खिअ, सक्कं खु आआवन्धेण अत्ताणअं धारिदुं (३)।

---

(१) भो, ब्राह्मणसंक्रामिताचरेण पितामहेनाभ्यनुज्ञातोऽसि ? आसनगतो भव, तेनाहमपि सुखासीनो भवामि ।

(२) यदेवमाज्ञापयति ।

(३) भो, न दृश्यते एव एषा उर्व्वशी, किन्तु तस्यास्तादृशमनुरागं प्रेक्ष्य, शक्यं खल्वायावन्धेनात्मानं धारयितुं ।

Digitized by Google

राजा। एवमेतत्, बलवान् मनसोऽभितापः; पुनः,

नद्यादव प्रवाहोविषमशिलासङ्कटस्खलितवेगः,

विच्छिन्नसमागमसुखोमनसिजयस्त्वनुगुणोभवति।

विदू। जधा परिहीअमाणेहिं अङ्गेहिं सोहसि; तधा अक्खरेहिं समागमं दे पेक्खामि (१)।

राजा॥ निमित्तं सूचयन्॥

वचोभिराश्वासननैर्भवानिव, गुरुव्यथं

अयं मां स्पन्दितैर्बाहुराश्वासयति दक्षिणः।

विदू। ण अण्णधा बम्हणवअणं भोदि (२)।

॥ राजा सप्रत्याशं तिष्ठति॥

॥ ततः प्रविश्यात्याकाशयानेन कृताभिसरणवेशा उर्वशी, चित्रलेखा च॥

उर्वशी॥ आत्मानं विलोक्य॥ सखि, रुचदि मे हिअअं मोत्ताहरणभूसिदो णीलमणिपरिग्गहोअहिसारिआवेसो (३)।

---

(१) यथा परिहीयमानैरङ्गैः शोभसे; तथाक्षरैः समागमं ते प्रेक्षे।

(२) नान्यथाब्राह्मणवचनं भवति।

(३) सखि, रोचते मे हृदयं मुक्ताभरणभूषितोनीलमणि परिग्रहोऽभिसारिकावेशः।

Digitized by Google

चित्र। अत्थि वा अम्हाविहवो पसंसिदुं; दूरं तु चिन्तेमि, अवि णाम अहंज्जेव पुरूरवाभवेय्यंत्ति (१)।

उर्व्व। सहि, असमत्था क्खु अहं; तुमं आणेहि तं णिग्घं, णेहि मं वा तस्स सुहअस्स वसदिं (२)।

चित्र। णं, पडिविम्बिअं विअ जामिणीजमुणाए केलास सिहरं सस्सिरीअं दे पिअतमस्स भवणमुपगदस्स (३)।

उर्व्व। तेण हि प्पभावेण जाणाहि, कहिं सो मम हिअअचोरो किम्वा अणुचिट्ठदित्ति (४)।

चित्र॥ आत्मगतं॥ होदु, कीडिस्सं दाव एदाए सह। ॥ प्रकाशं॥ हला, दिट्ठो मए उम्मत्तोअक्खमे अवआसे मणोरहलद्धं पिअसमागमसुहं अणुभवन्तो चिट्ठदि (५)।

---

(१) नास्ति वाऽस्मिद्भवः प्रशंसितुं; दूरन्तु चिन्तयामि, अपि नाम अहमेव पुरूरवाभवेयमिति।

(२) सखि, असमर्था खल्वहं त्वमानय तं शीघ्रं नय मां वा तस्य सुभगस्य वसतिं।

(३) ननु, प्रतिबिम्बितमिव यामिनीयमुनायां कैलास शिखरं सश्रीकं ते प्रियतमस्य भवनमुपगतं खः।

(४) तेन हि प्रभावेण जानीहि, कुत्र स मम हृदयचोरः किम्वानुतिष्ठतीति।

(५) भवतु, क्रीडिष्यामि तावदेतया सह। सखि, दृष्टो

Digitized by Google

उर्व्व। अवेहि, हिअअं ण मे पत्तिआअदि। हला चित्तलेहे, हिअए काउण, किंपि जंपेसि। पिअसमागमस्स अग्गदोज्जेव अणेण मे अवहरिदं हिअअं (१)।

चित्र ॥ विलोक्य॥ एसो मणिहम्मपासादगदो वअस्सेत्त सहाओ राएसी; ता उपसप्पम्ह (२)॥ उभे अवतरतः॥

राजा। वयस्य, रजन्यां विजृम्भते मदनबाधा।

उर्व्व। अभिण्णत्थेण दूमिणा वअणेण आकम्पितं मे हिअअं, अन्तरहिदा सुणम्ह से आलावं जाव णो संसअच्छेओ भोदि(३)॥

मयोपभोगक्षमेऽवकाशे मनोरथलब्धं प्रियसमागमसुखमनुभवंस्तिष्ठति।

(१) अपेहि, हृदयं न मे प्रत्येति। सखि चित्रलेखे, हृदये कृत्वा किमपि जल्पसि। प्रियसमागमस्यायतएवानेनापहृतं मे हृदयं।

(२) एष मणिहर्म्यप्रासादगतो वयस्यमाचसहायो राजर्षिस्तस्मादुपसर्पावः।

(३) अभिन्नार्थेनानेन वचनेनाकम्पितं मे हृदयं। अन्तर्हिते शृणुवः अस्यालापं यावदावयोः संशयच्छेदोभवति।

Digitized by Google

चित्र। जं दे रोअदि (१)।

विदू। णं दुमे अमिअगब्भा सेवीअदु चन्दवादा (२)।

राजा। वयस्य, एवमादिभिरनुकम्योऽयमातङ्कः।

कुसुमशयनं न प्रत्यग्रं, न चन्द्रमरीचयो,
न च मलयजं सर्व्वाङ्गीनं, न वा मणिभूषणाः;
मनसिजरुजं सा वादिद्या ममालमपोहितुं;
रहसि सघयेदारब्धा वा तदाश्रयणी कथा।

उर्व्व। हिअअ जं दाणिं सि मं उज्झिऊअ, दूदो संकन्तं तस्स फलं तए उअलद्धं (३)।

विदू। आं; भो, अहंपि जधा सिहरिणीं रसालञ्च ण लहे, तधा तं एव्व चिन्तअन्तो आसादेमि सुहं (४)।

राजा। सम्पद्यते पुनर्भवतः।

---

(१) यत्ते रोचते।

(२) नन्विमे अमृतगर्भाः सेव्यन्तां चन्द्रपादाः।

(३) हृदय, यदिदानीमसि मामुज्झित्वा, दूतःसंक्रान्तं तस्य फलं त्वयोपलब्धं।

(४) भो, अहमपि यथाशिखरिणीं रसालञ्च न लभे, तदा तदेव चिन्तयन्नासादयामि सुखं।

Digitized by Google

विदू। तुमम्पि तं अदरेण पाविहि (१)।

राजा। सखे, एवं मन्ये।

चित्र। सुण, असंतुट्ठे (२)।

विदू। कथम्मिअ! (३)

राजा। इदं तया रथक्षोभादङ्गेनाङ्गं निपीडितं,
एकं क्षति शरीरेऽस्मिन्, श्रेयमङ्गं भुवोभरः।

उर्व्व। किं दाणिं अवरं विलम्बिस्सं ॥ सहसोपगम्य॥ हला चित्तलेहे, अग्गदोवि मए ठिदाए उदासीणो महाराओ (४)।

चित्र ॥ सस्मितं॥ अदित्तुवरिदे, असंक्खित्त तिरक्करिणी अम्हि (५)।

॥ नेपथ्ये॥ दट्ठो दट्ठो भट्टिणी (६)।

॥ सर्व्वे कर्णं ददति॥

---

(१) त्वमपि तामचिरेण प्राप्स्यसि।

(२) शृणु, असंतुष्टे।

(३) कथमिव!

(४) किमिदानीमपरं विलम्बिष्ये? सखि, चित्रलेखे, अग्रतोऽपि मम स्थिताया उदासीनो महाराजः।

(५) अतित्वरिते, असंक्षिप्ततिरस्करिण्यस्मि।

(६) दृष्ट दृष्टो भट्टिनी।

Digitized by Google

॥ उर्व्वशी सह सख्या विषण्णा ॥

विदू। अविद अविद, भो, उवत्थिदा देवी, ता मुद्दिदमुहो होहि (१)।

राजा। भवानपि सम्मृताकारमास्तां।

उर्व्वे। हला, एत्थ किं करणीज्जं? (२)

चित्र। अलं आवेएण, अन्तरिदा दाणिं सि तुमं, विहिद णिअमव्यावारा अ महिसी दीसदि; ता एसा ण चिरं चिट्ठ स्सदित्ति (३)।

॥ ततः प्रविशति धृतोपहारपरिजना देवी ॥

देवी ॥ चन्द्रमालोक्य ॥ हञ्जे, एसो रोहिणीजोएण अहिअं सोहदि भअवं मिअलाञ्छणो (४)।

चेटी। णं, सम्पज्जिस्सदि भट्टिणीसहिदस्स भट्टिणोविसेस रमणीअदा (५)॥ इति परिक्रामतः॥

---

(१) विस्मये; भो, उपस्थिता देवी, तत् मुद्रितमुखो भव।

(२) सखि, किमत्र करणीयं?

(३) अलमावेगेन, अन्तरिता इदानीमसि त्वं, विहित नियमव्यापारा च महिषी दृश्यते; तदेषा न चिरं स्थास्यतीति।

(४) सखि, एष रोहिणीयोगेनाधिकं शोभते भगवान् मृगलाञ्छनः।

(५) ननु, सम्पत्स्यते, भट्टिनीसहितस्य भर्त्तुर्विशेषरमणीयता।

Digitized by Google

विदू। भो, णं, आणामि, सोत्थिवाअणिअम्मि देहि, अधवा भवन्तं अन्तरेण चन्दवदव्यवदेसेण मुक्करोसा अज्ज मे अच्छीणं सुहदंसणा देवी (१)।

राजा॥ सस्मितं॥ उभयथापि भवतः यत्तु पश्चादभिहितं; तन्मां प्रतिभाति, यदत्रभवती

सितांशुकामङ्गलमात्रभूषणा,
विचिन्वदूर्व्वाङ्कुरलाञ्छिभालका,
व्रतोपदेशोज्झितगर्व्ववृत्तिना,
मम प्रसन्ना वपुषैव लक्ष्यते।

देवी॥ उपगम्य॥ जअदु जअदु, अज्जउत्तो (२)।

परिजनः। जअदु जअदु, देओ (३)।

विदू। सोत्थि भोदीए (४)।

---

(१) भो ननु, जानामि स्वस्तिवाचनिकमपि ददाति, अथवा भवन्तमन्तरेण चन्द्रव्रतव्यपदेशेन मुक्तरोषा अद्य मे अक्ष्णोः सुभदर्शना देवी।

(२) जयतु जयतु, आर्य्यपुत्रः।

(३) जयतु जयतु, देवः।

(४) स्वस्ति भवत्याः।

Digitized by Google

राजा। देवि, स्वागतं ॥ हस्ते गृहीत्वोपवेशयति ॥

उर्व्व। ट्ठाणे दूअं हि देईसद्देण उच्चरीअदि, ण किं पि परिहीअदि अचीदो ओजस्सिदाए (१)।

चित्र। अत्थि अवरं मुहं मन्तिदुं दे (२)।

देवी। अज्जउत्तं पुरो कदुअ, कोवि वदविसेसो मए सम्मादनीओ, ता मुहुत्तअं उवरोधो सहीअदु (३)।

राजा। माणवक, अनुग्रहः खलूपरोधः।

विदू। दिट्ठिआ णं सोत्थिवाअणं करन्तो मम वअस्सो उवरोधो भोदु ॥ ४ ॥

राजा। किन्नामधेयमेतद्देव्याव्रतं।

॥ देवी निपुणिकामवलोकयति ॥

चेटी। भट्टा पिअप्पसादणं णाम (५)

राजा ॥ देवीं विलोक्य ॥

---

(१) स्थाने दूतं हि देवीशब्देनोच्चार्य्यते, न किमपि परिहीयते अचीत ओजस्वितया।

(२) अस्ति अपरं मुखं मन्त्रितुं ते।

(३) आर्य्यपुत्रं पुरः कृत्वा, कोऽपि व्रतविशेषो मया सम्मादनीयः, तन्मुहूर्त्तमुपरोधः सह्यतां।

(४) ईदृशं ननु स्वस्तिवाचनं कुर्व्वतो मम वयस्यस्योपरोधो भवतु।

(५) प्रियप्रसादनं नाम।

Digitized by Google

अनेन कल्याणि मृणालकोमलं व्रतेन गात्रं क्षपयस्यहर्निशं;
प्रसादमाकाङ्क्षति यस्तवोत्सुकस्य किन्त्वया दासजनः प्रसाद्यते,

उर्व्व ॥ सवैलक्ष्यस्मितं ॥ महन्तो खलु, एतस्मिं एदस्स वड्ढमाणे (१)।

चित्र। अरे मुद्धे, अन्यसंक्रान्तप्रेमाणो णामरा, अहिअं दक्खिणा होन्ति (२)।

देवी। एदस्स वदस्स अअं पहाओ; जं एत्तिअ वाधिदो अज्जउत्तो (३)।

विदू। विरमदु भवं; ण जुत्तं बन्धुहासिअं पच्चक्खादुं (४)

देवी। दारिआओ, आणेध उवहारअं; जाव हम्मगदे चन्दवादे अच्चेमि (५)।

---

(१) महान् खलु, एतस्मादेतस्य वर्द्धमानः।

(२) अयि मुग्धे, अन्यसंक्रान्तप्रेमाणो नागरा अधिकं दक्षिणा भवन्ति।

(३) एतस्य व्रतस्यायं प्रभावो यदेतावदाधितआर्य्यपुत्रः।

(४) विरमतु भवान्, न युक्तं बन्धुभाषितं प्रत्याख्यातुं।

(५) दारिके, आनयत उपहारकं; यावत् हर्म्यगतांश्च ऋषादानर्घयामि।

Digitized by Google

परिजनः। जं देई आणवेदि। एसो उवहारो (१)।

देवी। उवणेहि॥ नाट्येन कुसुमादिभिश्चन्द्रपादानभ्यर्च्य॥ हञ्जे, इमेहिं उवहारेहिं मोदएहिं अज्जमाणवअं कञ्चुइअ अच्चेध (२)।

परिजनः। जं देवी आणवेदि; अज्जमाणवअ, एदं उववादिदं सोत्थिवाअणिअं (३)।

विदू॥ मोदकमरावं गृहीत्वा॥ सोत्थि भोदीए; वड्ढफलो एसो वदो भोदु (४)।

चेटी। अज्ज कञ्चुइ इदं तुह (५)।

कञ्चुकी॥ गृहीत्वा॥ स्वस्ति देव्यै।

देवी। अज्जउत्त, इदोदाव (६)।

राजा। अयमस्मि।

---

(१) यद्देवी आज्ञापयति। एष उपहारः।

(२) उपनय॥ एतैरुपहारैर्मोदकैरार्य्यमाणवकं कञ्चुकिनञ्चार्चय।

(३) यद्देवी आज्ञापयति; आर्य्यमाणवक, इदमुपपादितं स्वस्तिवाचनिकं।

(४) स्वस्ति भवत्या; वर्द्धतामिदं व्रतं भवतु।

(५) आर्य्य कञ्चुकिन्, इदं तव।

(६) आर्य्यपुत्र. इतस्तावत्।

Digitized by Google

देवी॥ राज्ञः पूजामभिनीय, प्राञ्जलिः प्रणम्य॥ एषा देवदामिञ्ञणं रोहिणी मिअङ्कञ्ञणं साक्खीकदुअ, अज्जउत्तमणुप्पसादेमि; अज्जपञ्ञदि अज्जउत्तो जं दूत्थिअं कामेदि, जा अ अज्जउत्तसमागमप्पणदूणी, ताए सह अप्पलिबन्धेण वत्तिदव्वं(१)।

उर्व्व। अम्महे! ण आणामि किं परं से वअणं ममउण विस्सासविसदं हिअअं सम्वुत्तं! (२)

चित्र। सहि, महानुभावाए पदिव्वदाए अणुण्णादो, अणन्तराओ दे पिअसमागमोभविस्सदित्ति (३)।

विदू॥ अपवार्य्य॥ किंणहत्थस्स पुरतो वञ्चे पलाइदे भणादि, गच्छ, धम्मोभविस्सदित्ति॥ प्रकाशं॥ भोदि, किं उदासीणो तत्थभवं (४)।

---

(१) एषा देवतामिथुनं रोहिणीमृगलाञ्छनं साक्षीकृत्य आर्य्यपुत्रं प्रसादयामि; अद्यप्रभृति आर्य्यपुत्रो यां स्त्रियं कामयते, या च आर्य्यपुत्रसभागमप्रणयिनी, तया सह अप्रतिबन्धेन वर्त्तितव्यं।

(२) आश्चर्य्यं! न जाने किमयमस्यावचनं मम पुनर्व्विश्वास विषदं हृदयं सम्वृत्तं!

(३) सखि, महानुभावया पतिव्रतया अभ्यनुज्ञातः, अनन्तरायस्ते प्रियसमागमो भविष्यतीति।

(४) च्छिन्नहस्तस्य पुरतोबध्ये पलायिते भणति, गच्छ, धर्म्मोभविष्यति। भवति; किमुदासीनस्तत्रभवान्।

Digitized by Google

देवी। मूढ, अहं खु अत्तणो सुहावसाणेण अज्जउत्तस्स सुहमिच्छामि; एत्तिकेण चिन्तेहिं दाव पिओ णवेत्ति (१)।

राजा। दातुमसहने प्रभवसि न्यस्तौ, कर्त्तुमेव वा दास्यं,
नाहं पुनस्तथा त्वयि यथा हि मामाशङ्कसे भीरु।

देवी। भोदु; जहा णिद्दिट्ठं सम्पादिदं पिअपसादणव्वदं; ता एध परिअणा गच्छह्म (२)।

राजा। न खलु प्रसादितमपि प्रतिविहाय गम्यते।

देवी। अज्जउत्त, अलंघितपुव्वोसम्पदं णिअमो (३)।

॥ इति सपरिजना निष्क्रान्ता ॥

उर्व्व। हला, पिअकलत्तोराएसी, ण उण हिअअं णिअत्तादुं सक्केमि (४)।

---

(१) मूढ अहं खलु, आत्मनः सुखावसानेन आर्य्यपुत्रस्य सुखमिच्छामि; एतावन्मात्रकेण चिन्तया तावत् प्रियो न वेति।

(२) भवतु; यथानिर्दिष्टं सम्पादितं प्रियप्रसादनव्रतं; तस्मादागच्छत परिजनागच्छामः।

(३) आर्य्यपुत्र, अलङ्घितपुर्वः खल्वयं नियमः।

(४) सखि, प्रियकलत्रोराजर्षिर्न पुनर्हृदयं निवर्त्तयितुं शक्नोमि।

Digitized by Google

चित्र। कधं थिराणा णिअत्तीअदि? (१)

राजा॥ आसनमुपसृत्य॥ वयस्य, दूरं गता देवी?

विदू। भण वीसत्थो जं सि वत्तुकामो; असाज्झोत्ति; परिच्छिदिअ आदुरोविअ विज्जेण अइरेण मुक्का तत्थभोदीए भवं (२)।

राजा। अपि नामोर्व्वशी।

उर्व्व॥ आत्मगतं॥ अज्ज कदत्थोभवे (३)।

राजा। गूढं नूपुरशब्दमात्रमपि मे कान्तं श्रुतौ पातयेत्,
पश्चादेत्य शनैः करोत्पलवृते कुर्व्वीत वा लोचने;
हर्म्येऽस्मिन्नवतीर्य्य साध्वसवशान्मन्दायमाना बला,
दानीयेत पदात्पदं चतुरया सख्या ममोपान्तिकं।

चित्र। हला उव्वसि, इदं दाव से मनोरहं सम्पादेहि(४)।

उर्व्व॥ समाध्वसं॥ कीडिस्सं दाव (५)।

॥ इति पृष्ठेनागत्य राज्ञो लोचने संवृणोति॥

---

(१) कथं स्थिरासना निर्व्वर्त्यते?

(२) भण, विश्वस्तोयदसि वक्तुकामः; असाध्वदति परिच्छिद्यातुरदव वैद्येनाचिरेण मुक्तस्तवभवत्या भवान्।

(३) आर्य्यः कृतार्थोभवेत्।

(४) सखि उर्व्वशि, तावदस्य मनोरथं सम्पादय।

(५) क्रीडिष्यामि तावत्।

Digitized by Google

॥ चित्ररेखा विदूषकं संज्ञां लभयति ॥

राजा ॥ स्पर्शं रूपयिता ॥ सखे, न खलु नारायणोरु सम्भवा वरोरूः ?

विदू। कधं भवं अवगच्छदि ? (१)

राजा। किमत्र ज्ञेयमन्यत्।

कथमपि पुलकैः कलितं मम गात्रकं करस्पर्शात्
नोच्छ्वसिति तपनकिरणैस्तप्तश्लेषादुभिः कुमुदं।

उर्व्व। अज्ज हे! वज्रलेपघटितं विअ मे हत्थजुअलं, न मम त्थाम्मि अवणेदुं (२)।

॥ इति मुकुलिताक्षी चक्षुषोर्हस्तावपनीय ससाध्वसा तिष्ठति॥

॥ कथञ्चिदुपसृत्य ॥ जअदु जअदु, महाराअ (३)॥

चित्र। सुहं दे वअस्सस्स (४)।

राजा। नन्वेतदुपपन्नं।

उर्व्व। हला, देवीए दिण्णो महाराओ; अदो से पणअवदी

---

(१) कथं भवानवगच्छति ?

(२) आर्य्ये! वज्रलेपघटितमिव मे हस्तयुगलं, न मम शक्नोमि अपनेतुं।

(३) जयतु जयतु, महाराजः।

(४) सुखं ते वयस्यस्य।

Digitized by Google

विअ सरीरसंगदासि; मा खु मं पुरोभाइणित्ति वम त्थोसि (१)।

विदू। कधं दधम्मेव तुह्माणं अत्थमिदो सूरो? (२)।

राजा॥ उर्वशीमवलोक्य॥

देव्यादत्तइति यदि व्यापारं व्रजसि मे शरीरेऽस्मिन्,
प्रथमं कञ्चानुमते चोरितं मे त्वया हृदयं।

चित्र। वअस्स, निरुत्तरा एसा; मम वअणं विणविअ सुणी अदु (३)।

राजा। अवहितोऽस्मि।

चित्र। वसन्ताणन्तरं उण्हसमए भअवं सुज्जो मए उव अरिदव्वो, ता जधा दूअं पिअसही सआसं ण उक्कण्ठेदि, तधा वअस्सेण कादव्वं (४)।

---

(१) सखि, देव्यादत्तोमहाराजः, अतोऽस्य प्रणयवतीव शरीरसंगतासि; मा खलु मां पुरोभागिनीति वमर्थयसि।

(२) कथमिदैव युवयोरस्तमितः सूर्यः?

(३) वयस्य निरुत्तरा एषा; मम वाक्यं विज्ञप्तिः श्रूयतां।

(४) वसन्तानन्तरमुष्णसमये भगवान् सूर्यो मयोपचरितव्यस्तस्मात् यथा दूतं प्रियसखी स्वकर्मस्थं नोत्कण्ठते, तथा वयस्येन कर्त्तव्यं।

Digitized by Google

विदू। किम्बा सग्गो सुमरिदव्वं, ण तत्थ खाईअदि, ण वा पिवीअदि, केवलमणिमिसेहिं अच्छीहिं मीणदा अवलम्बीअदि (१)।

राजा। वयस्य, अनिर्देश्यसुखं स्वर्गं कथं विस्मारयिष्यते;

अनन्यनारी,सामान्योदासस्यायं पुरूरवाः।

चित्र। अणुग्गहिदम्हि; हला उव्वसि, अकादरा भविअ विसज्जेहि मं (२)।

उर्व्व॥ चित्रलेखां परिष्वज्य सकरुणं॥ सहि, मा क्खु मं विसुमरेसि (३)।

चित्र॥ सस्मितं॥ वअस्सेण संगदा तुमं मए एवं जाचिदव्वा (४)।

॥ राजानं प्रणम्य निष्क्रान्ता॥

विदू। दिट्ठिआ मणोरहसिद्धीए वड्ढदु भवं (५)।

---

(१) किम्बा स्वर्गे स्मर्त्तव्यं, न तत्र खाद्यते, नवा पीयते, केवलमनिमिषैरक्षिभिर्मीनतावलम्ब्यते।

(२) अनुगृहीतास्मि; सखि उर्व्वशि, अकातरा भूत्वा विसर्जय मां।

(३) सखि, मा खलु मां विस्मरिष्यसि।

(४) वयस्येन संगता त्वं मया याचितव्या।

(५) दिष्ट्या मनोरथसिद्धौ वर्द्धतां भवान्।

Digitized by Google

राजा। दृमां तावन्मनोरथसिद्धिं पश्य;

सामन्तमौलिमणिरञ्जितपादपीठ
मेकातपत्रमवनेर्न तथा प्रभुत्वं;
अस्याः, सखे, चरणयोरहमद्य कान्त
मास्थाकरत्वमधिगम्य यथा कृतार्थः।

उर्व्व। णत्थि मे वाआविहवो अदो अवरं मन्तिदुं(१)।

राजा॥ हस्तेनावलम्ब्य उर्व्वशीं॥ अहो अविरुद्धसम्बर्द्धनमेतदिदानीमीप्सितलाभानां। यतः,

पादास्तएव शशिनः सुखयन्ति गात्रं,
बाणास्तएव मदनस्य मनोऽनुकूलाः;
संरम्भरुक्षमिव, सुन्दरि, यद्यदासी
त्वत्सङ्गमेन मम तत्तदिवानुनीतं।

उर्व्व। अवराद्धाम्हि, चिरआरिआ महाराअस्स(२)।

राजा। सुन्दरि, मा मैवं।

यदेवोपनतं दुःखं सुखं तदत्यन्तरं;
निर्व्वाणाय तरुछाया तप्तस्य हि विशेषतः।

---

(१) नास्ति मे वाग्विभवोऽतोऽपरं मन्त्रयितुं।

(२) अपराद्धास्मि चिरकारिका महाराजस्य।

Digitized by Google

विदू। भोदि, सेविदा पदोसरमणीआ चन्दपादा; समओ दे गेहप्पवेसस्स (१)।

राजा। तेन हि सख्यामार्गमादेशय।

विदू। दट्ठो दट्ठो भोदी॥ इति परिक्रामति (२)।

राजा। सुन्दरि, इयमिदानीं मे प्रार्थना।

उर्व्वं। केरिसी सा? (३)।

राजा। अनधिगतमनोरथस्य पूर्व्वं,
शतगुणितेव गता मम त्रियामा,
यदि तु तव समागमे तथैव,
प्रसरति, सुभ्रु, ततः कृती भवेयं।

॥ इति निष्क्रान्ताः॥

तृतीयोऽङ्कः।

---

(१) भवति, सेविताः प्रदोषरमणीयाश्चन्द्रपादाः; समय यस्ते गेहप्रवेशस्य।

(२) दृतदृतोभवती।

(३) कीदृशी सा?।

इति तृतीयाङ्कविवृतिः।

Digitized by Google

अथ चतुर्थोऽङ्कः।

प्रियसखिवियोगविमना सखीसहिता व्याकुला समुल्लसति;
सूर्य्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे (१)।

॥ सहजन्याचित्रलेखयोः प्रावेशिक्याचित्रिका॥

ततः प्रविशति सहजन्या चित्रलेखा च।

चित्र॥ प्रवेशान्तरे, द्विपदिकया, दिशोऽवलोक्य॥

सहचरि, दुःखालिढ्यं सरवरे स्निग्धं,
वात्सवल्गितनयनकं ताम्यति हंसीयुगलकं (२)।

सह॥ सखेदं॥ चित्तलेहे, मिलायमाणसअवत्तकसणा दे मुहच्छाया; हिअअस्स असुत्थिदं सूएदि; ता कधेहि मे अणिव्वदि कारणं, जेण दे समाणदुक्खा होमि (३)

---

(१) प्रियसखीवियोगविमनाः सखीसहिता व्याकुला समुल्लसति।
सूर्य्यकरस्पर्शविकसिततामरसे सरोवरोत्सङ्गे।

(२) सहचरि, दुःखालीढं सरोवरे स्निग्धं,
वात्सवल्गितनयनकं ताम्यति हंसीयुगलकं।

(३) चित्रलेखे, म्लायमानशतपत्रकृष्णा ते मुखच्छाया हृदयस्वास्थ्यतां सूचयति, तत्कथय मे अनिर्वृतिकारणं, येन ते समानदुःखा भवामि।

Digitized by Google

चित्र ॥ सकरुणं ॥ सखि, अक्षरावावारपर्य्यायेण तत्य भअदो सुज्जस्स उअत्थाणे वट्टन्तीए पिअसहीए विणा वसन्त समओ आगदोत्ति, वलिअं उक्कण्ठिदम्हि (१)।

सह। सखि, जाणामि वो अण्णोण्णगदं पेम्मं; तदो तदो (२)।

चित्र। तदो एदेसुं दिअसेसुं कोनुहि वुत्तन्तो वट्टदित्ति, पणिधाणट्ठिदाए मए अच्चाहिदं उअलद्धं (३)।

सह। केरिसं तं? (४)

चित्र॥ सकरुणं॥ उव्वसी किल तं राएसिं लच्छीसनाहं गेङ्किअ, अमच्चेसुं निवेसिदरज्जधुरं, केलासगिहरुद्देसे गन्धमादणवणं विहरिदुं गदा (५)।

---

(१) सखि, अक्षरोव्यापारपर्य्यायेण तत्रभवतः सूर्य्यस्योपस्थाने वर्त्तमानया सख्या विना वसन्तआगतइति बलवदुत्कण्ठितास्मि।

२) सखि, जानामि युवयोरन्योन्यगतं प्रेम, ततस्ततः।

(३) तत्र एतेषु दिवसेषु कोनवृत्तान्तोवर्त्ततइति प्रणिधानस्थितया मया अत्याहितमुपलब्धं।

(४) कीदृशं तत्?

(५) उर्व्वशी किल तं राजर्षिं लक्ष्मीसनाथं गृहीत्वा, अमात्येषु निवेशितराज्यधुरं, कैलासगिरिशिखरोद्देशे गन्धमादनवनं विहर्त्तुं गता।

Digitized by Google

सह॥ सखाघं॥ सखि, स सम्भोग्रो जो तादिसेसु प्पदेसेसु; तदो तदो (१)।

चित्र। तदो, तहिं मन्दाइणीतीरे सिकदापव्वदेहिं कीलमाणा, उदम्बवदी णाम विज्जाहरदारिआ, तेण राएसिणा खणं निज्झादइत्ति कदुअ, कुविदा मे पिअसही उव्वसी (२)।

सह। असहमाणा खु सा, दूरारूढो से प्पणओ, ता भविदव्वदा एत्थ बलवदी; तदो तदो (३)।

चित्र। तदो, सा भत्तुणो अणुणयं अपडिवज्जमाणा, गुरुसाव संमूढहिअआ विसुमरिददेवदानिअमा, कण्णआजणपरिहरणीअं कुमारवणं पविट्ठा। पवेसाणन्तरञ्च काणणोवन्तवत्तिलदाभावेण परिणदं से रूअं (४)।

---

(१) सखि, स सम्भोगः यस्मादृशेषु प्रदेशेषु; ततस्ततः।

(२) तत, स्मिन् मन्दाकिनीतीरे सिकतापर्व्वतैः क्रीडमाना उदकवती नाम विद्याधरदारिका तेन राजर्षिणा क्षणं निर्ध्यातेति श्रुत्वा, कुपिता मे प्रियसखी उर्व्वशी।

(३) असहमाना खलु सा, दूरारूढस्यास्याः प्रणयस्तस्मात् भवितव्यताच बलवती ततस्ततः।

(४) ततः सा भर्त्तुरनुनयमप्रतिपद्यमाना, गुरुशाप संमूढहृदया विस्मृतदेवतानियमा, कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा। प्रवेशानन्तरञ्च काननोपान्तवर्त्तिलता भावेन परिणतमस्यारूपं।

Digitized by Google

सह ॥ सशोकं ॥ सर्व्वथा णत्थि विहिणो अलंघणीअं णाम; जेण तारिसस्स रूवस्स अण्णारिसो च्चेव परिणामो संवुत्तो; तदो तदो (१)।

पुच। तदो, सोवि तस्मिंच्चेव काणणे पिअसहीं अण्वेषयन्तो उन्मत्तीभूदो, दूदो उव्वशी, तदो उव्वशीत्ति, अहोरत्तादं अदिवाहेदि ॥ नभोऽवलोक्य ॥ एदिणा उण णिव्विदाणम्पि उक्कण्ठाकारिणा मेहोदएण अप्पदीआरो भविस्सदित्ति तक्केमि (२)।

॥ अनन्तरं जम्भालिका ॥ *

---

(१) सर्व्वथा नास्ति विधेरलंघनीयं नाम; येन तादृशस्य रूपस्यान्यादृशएव परिणामः सम्वृत्तः ततस्ततः।

(२) ततः, सोऽपि तस्मिन्नेव कानने प्रियसखीमन्वेषयन्नुन्मत्तीभूत, दूतउर्व्वशी, ततउर्व्वशीति, अहोरात्रमतिवाहयति। एतेन पुननिर्वृतानामप्युत्कण्ठाकारिणा मेघोदयेनाप्रतीकारो भविष्यतीति तर्कयामि।

---

* जम्भालिकागीतिविशेषः यथा। शुद्धा खण्डा च मात्रा च सम्पूर्णेति चतुर्व्विधा। भवेद्विपदिकागीतिर्भरतेन प्रकीर्त्तिता। भवेच्चतुर्भिश्चरणैस्त्रयोदशकलात्मकैः। शुद्धा द्विपदिकागीतिः सैवा जम्भालिकोच्यते।

Digitized by Google

सहअरिदुक्खालिद्धअं, सरवरअम्मि सिणिद्धअं,
अविरलवाहजलोल्लअं, तम्मद हंसीजुअलअं (१)।

सह। सहि, अत्थि कोवि समागमोवाओ? (२)

चित्र। गोरीचरणरागसम्भवं सङ्गममणिं वज्जिअ, कुदो से समागमोवाओ? (३)

सह। ण ईदिसा आकिदिविसेसा चिरं दुक्खभाइणो होन्ति; ता अवस्सं कोवि अनुग्गहणिमित्तभूओ समागमोवाओ भविस्सदित्ति तक्केमि॥ प्राचीं दिशं विलोक्य॥ ता एहि उअ आदिवस्स भअवदो सुज्जस्स उवत्थाणं करेम्ह (४)।

॥ अनन्तरं खण्डधारा॥ *

---

(१) सहचरीदुःखालीढकं सरोवरे स्निग्धकं।
अविरलवाष्पजलोष्णकं तामयति हंसीयुगलकं।

(२) सखि, अस्ति कोऽपि समागमोपायः?

(३) गौरीचरणरागसम्भवं सङ्गममणिं वर्ज्जयित्वा, कुतोऽस्याः समागमोपायः?

(४) नेदृशाआकृतिविशेषाश्चिरं दुःखभागिनोभवन्ति; तस्मादवश्यं कोऽपि अनुग्रहनिमित्तभूतः समागमोपायो भविष्यतीति तर्कयामि। तस्मादेहि उदयाधिपस्य भगवतः सूर्य्यस्योपस्थानं कुर्व्वः।

---

* चतुर्दशकलायुक्तैश्चतुर्भिश्चरणैरिह
खण्डाख्या दिपदीगीतिः खण्डधारापि सा भवेत्।

Digitized by Google

चिन्तादुम्मिअमाणसिआ, सहचरिदंसणलालसिआ,
विअसिअकमलमणोहरए, विहरद हंसी सरवरए (१)।

॥ इति निष्क्रान्ते ॥ प्रवेशकः।

॥ नेपथ्ये ॥

गहणं गइन्दणाहो पिअविरहोम्मादपअडिअविआरो,
विसद तरुकुसुमकिसलअभूसिअणिअदेहपब्भारो (२)।

॥ पुरूरवसः प्रावेशिक्याचित्रिका ॥ *

॥ ततः प्रविशति आकाशबद्धलक्षः सोन्मादो, राजा ॥

राजा ॥ सक्रोधं ॥ आ दुरात्मन् रक्षसिष्ठ, तिष्ठ; मम प्रियतमामादाय, क्व गच्छसि ॥ विलोक्य ॥ कथं, शैलशिखरादुगणमुपेत्य वाणैर्मामभिवर्षति ॥ इति क्रोधं गृहीत्वा हन्तुं धावन् ॥ अनन्तरं द्विपदिकया दिशोऽवलोक्य ॥ *

---

(१) चिन्तादूनमानसिका, सहचरीदर्शनलालसिका,
विकसितकमलमनोहरे, विहरति हंसी सरोवरे।

(२) गहनं गजेन्द्रनाथः प्रियाविरहोन्मादप्रकटितविकारः
विशति तरुकुसुमकिसलयभूषितनिजदेहप्राग्भारः।

---

* आचित्रिका पात्रप्रवेशसूचिका गीतिः। गाथा छन्दस्त लक्षणं पिङ्गले। पढमं वारहमत्ता वीए अट्ठारहेण संजुत्ता जह पढमं तह तीअं दहपञ्च विभूसिआ गाहा।

* दिशोऽवलोक्य पूर्व्वलक्षितया द्विपदाख्यगीत्या वदतीत्यर्थः। एवं सर्व्वत्र व्याख्येयः।

Digitized by Google

हिअआहिअपिअदुक्खओ, सरवरए धुअपक्खओ,
वाहोवग्गिअणअणओ, तम्मइ हंसजुआणओ (१)।

॥ विभाव्य सकरुणं ॥

कथं नवजलधरः सन्नद्धोऽयं, न दृप्तनिशाचरः।

॥ पुनर्द्विपदिकया निःश्वस्य ॥

सुरधनुरिदं दूराद्दृष्टं, न नाम शरासनं;
अयमपि पटुर्द्धारासारो, न वाणपरम्परा;
कनकनिकषस्निग्धा विद्युत्प्रिया मम नोर्व्वशी।

॥ इति मूर्च्छितः पतति ॥ द्विपदिकयोत्थाय निःश्वस्य ॥

मन्ने जाणिअं मिअलोअणिं णिसिअरु कोवि हरइ;
जाव णु णवतलिणामल धाराहरु वरिसेइ (२)।

॥ इति क्वापि सकरुणं विचिन्त्य ॥ तत् खलु क्व नु गता स्यात्। निष्ठेत्कोपवशात् प्रभावपिहिता। अथवा। दीर्घन्न सा कुप्यति, स्वर्गायोत्पतिता भवेन्मयि पुनर्भावार्द्रमस्यामनः ॥ सरोषं ॥

तां द्रष्टुं विबुधद्विषोऽपि हि न मे शक्ताः पुरोवर्त्तिनीं
सा चात्यन्तमगोचरन्नयनयोर्यातेति कोऽयं विधिः ?

---

(१) हृदयाहितप्रियादुःखकः, सरोवरे धुतपक्षकः,
वाष्पोपवलितनयनस्तम्यति हंसयुवा।

(२) मया ज्ञातं मृगलोचनीं निशाचरः कोऽपि हरति;
यावत् नु नवतडिच्छ्यामलोधाराधरोवर्षति।

Digitized by Google

॥ द्विपदिकया दिशोऽवलोक्य निश्वस्य साखं ॥ अहो अपरा वृत्तभागधेयानां दुःखं दुःखानुबद्धमेव कुतः ?

अयमेकपदे तया वियोगः प्रियया चोपनतः सुदुस्सहोमे;
नववारिधरोदयाद्दिशोभिर्भवितव्यञ्च निरातपचरम्यैः।

॥ अनन्तरे चर्चरी ॥ *

जलहर, संहर एह कोप, मइ आढत्तओ,
अविरलधारासाराकन्तदिसामुहओ;
ए, मञ्जि पुहवि भमन्ते, जइ पिअ पेक्खिहिमि,
तव्वेजं जु करीहिसि, तं तु सहीहिमि (१)।

॥ चर्चरिकया विचिन्त्य ॥ वृथा खलु मनसः सन्तापदुर्द्धुरं पेक्ष्यते, यदा मुनयोऽप्येवं व्याहरन्ति राजा कालकारणमिति। तत्किमहमेनं जलधरसमयं प्रत्यादिशामि।

॥ अनन्तरे चर्चरी ॥

गज्जुम्मादअमउअरगीएहिं,
वज्जन्तेहिं परउअदूरेहिं,

---

(१) जलधर संहर अत्र मयि कोपं आरब्धः;
अविरलधारासाराक्रान्तदिङ्मुख।
अये, अहं पृथ्वीं भ्रमन् यदि प्रियां प्रेक्षिष्ये,
तदा यद्यत् करिष्यसि, तत्तत्सहिष्ये।

---

* चर्चरी गीतिविशेषः कदाचित्तु रागभेदः।

Digitized by Google

पवरिअपवणुल्लेलिअपल्लवणिअरु,
सुलहिअविविहपआरेहिं णच्चइ कप्पअरु (१)।

॥ तेन नर्त्तिला ॥ अथवा न प्रत्यादिशामि; यदि, प्रावृषेण्यैरेव चिह्नैः संप्रति महाराजोपचारः क्रियते ॥ विहस्य ॥

विद्युल्लेखाकनकरुचिरश्रीर्वितानं ममाभ्रं,
व्याधूयन्ते निचुलतरुभिर्मञ्जरीचामराणि;
घर्मच्छेदात्पटुतरगिरो वन्दिनो नीलकण्ठा,
धारासारोपनयनपरा नैगमाः साधुमन्तः।

॥ पुनश्चर्चरी ॥ भवतु, किं परिछदश्लाघया यावदस्मिन कानने प्रियां प्रणष्टामन्वेषयामि,

॥ पाठस्यान्तरे भिन्नकः ॥ *

दइआरहिओ, अहिअं दुहिओ, विरहाणुगओ परिमन्थरओ;
गिरिकाणणए कुसुमुज्जलए, गजजूहवई, उअ, झीणगई (२)।

---

(१) गर्ज्जोन्मादितमधुकरगीतै
र्व्याद्यमानैः परभृततूर्य्यैः,
प्रसरितपवनोद्वेल्लितपल्लवनिकरः,
सुलक्षितविविधप्रकारैर्नृत्यति कल्पतरुः।

(२) दयितारहितो, ऽधिकं दुःखितः, विरहानुगतः परिमन्थरः,
गिरिकानने कुसुमोज्ज्वले गजयूथपतिः, पश्य, क्षीणगतिः।

(*) भिन्नको रागविशेषः।

Digitized by Google

॥ अनन्तरं द्विपदिकया परिक्रम्यावलोक्य च सहर्षं ॥ हन्त, हन्त, व्यवसितस्य मे समवर्द्धनं वृत्तं।

आरक्तकोटिभिरियं कुसुमैर्नवकन्दलीमलिनगर्भैः,
कोपादलंव्याजे स्मारयति मां लोचने तस्याः।

इतोगतेति कथं मया खलु तत्रभवती सूचयितव्या। यतः

पद्भ्यां स्पृशेदसुमतीं यदि सा मृगाक्षी,
मेघाभिवृष्टसिकतासु वनस्थलीषु;
पश्चान्नता गुरुनितम्बतया ततोऽस्या,
दृश्येत चारुपदपङ्क्तिरलक्तकाङ्का।

॥ द्विपदिकया परिक्रम्यावलोक्य च ॥ हन्त, हन्त, उपलब्धमुपलक्षणं येन, तस्याः कोपनायाः सरसमुन्नीयते मार्गः।

क्षतौष्ठरागैर्नयनोदबिन्दुभिर्निमग्ननाभैर्निपतद्भिरङ्कितं,
च्युतं रुषाभिन्नगतेरसंशयं, शुकोदरश्यामसिदं स्तनांशुकं।

भवत्वादावे तावत्॥ परिक्रम्य विभाव्य च सासं॥ कथं, सेन्द्रगोपं सादलमिदं स्थानं। तत्कुतोऽस्मिन् विपिने प्रियाप्रवृत्तिमागमयेयं॥ विलोक्य॥ अयमासारोक्षितशैलतटस्थलीपाषाणमधिरूढः।

आलोकयति पयोदान्, प्रबलपुरोवातनर्त्तितशिखण्डः,
केकागर्भेण शिखी दूरोन्नमितेन कण्ठेन।

भवतु यावदेनं पृच्छामि।

*॥ अनन्तरं खण्डकः॥

(*) खण्डकोगीतिविशेषो यथा। पूर्व्वं चतुर्विंशतिभिरष्टाविंशतिभिःपरं। मात्राभिरिह यस्यार्द्धं खण्डकः स प्रकीर्त्तितः।

Digitized by Google

संपन्नविस्मरणश्रो, तुरितं परवारणश्रो,
प्रियश्रमदंसणलालसश्रो, गश्रवरु विम्हिश्रमाणसश्रो (१)।

॥ तेन खण्डकान्तरं चर्चरी ॥

वरहिणपश्र, पइँ श्रमत्थेमि, आश्रक्खुहि मे ता;
एत्थ श्ररण्णभमन्ते जइ पइँ दिट्ठी सा मञ्ज कान्ता?
णिसम्मइ मिश्रङ्कवरिसे वश्रणे, हंसगई;
ए चिह्ने जाणीहिसि, आश्रक्खिउ तुज्झ्रमई (२)।

॥ * चर्चरिकयोपविश्य श्रञ्जलिं बध्वा ॥

नीलकण्ठ, ममोत्कण्ठा वनेऽस्मिन् वलिता त्वया,
दीर्घापाङ्गा, सितापाङ्ग, दृष्टा दृष्टिसमा भवेत्।

॥ चर्चरिकयोपविश्य, विलोक्य च ॥ कथमदृश्यैव प्रतिवचनं नर्त्तितुमारब्धः?

पुनश्चर्चरी। तत्किन्नु खलु? प्रहर्षकारणमस्य श्रां ज्ञातं!

---

(१) संप्राप्तखेदस्त्वरितं, परवारणः
प्रियतमादर्शनलालसः, गजवरोविस्मितमानसः।

(२) वर्हिणप्रभो, त्वामभ्यर्थये, आचक्ष्व मे तत्; अरण्ये भ्रमता यदि त्वया दृष्टा सा मम कान्ता? निशामय मृगाङ्क सदृशं वदनं, हंसगतिः, एतच्चिह्नं जानीहि आख्यातं तुभ्यं मया।

---

* चर्चरिकयोपविश्येत्यादौ चर्चरिका गतिविशेषः।

Digitized by Google

मृदुपवनविभिन्नो यत्प्रियायाः प्रणामा
ह्यनरुचिरकलापो निःसपत्नोऽस्य जातः;
रतिविगलितबन्धे केशपाशे सुकेश्याः,
यति कुसुमसनाथे कं हरेदेव बर्हः।

भवतु, परव्यसनसुखितं न पुनरेनं पृच्छामि॥ दिष्ट्या दिष्ट्योऽवलोक्य, ॥ अये दृष्टमात्रपात्रसम्भृतमदा जम्बूविटप मध्यास्ते, परभृता। विहगेषु पण्डितैषा जातिः। यावदेनं पृच्छामि॥ अनन्तरे खुरकः॥ *

विज्झाअरकाणणलीणओ, दुक्खविणिग्गअवाऊपीडओ,
दूरोसारिअहिअआणन्दओ, अंवरमाणेण भमइ गइन्दओ।
(१)।

॥ खुरकानन्तरे चर्चरी॥

हेले, हेले, परभुअ, मञ्जुरपलाविणी कन्ती णन्दणवणे सच्छन्द भमन्ती,

जइ पुंइ पिअअम सा मज्झ दिट्ठा, ता आअक्खहि मज्झ, परपुट्ठा (२)।

(१) विद्याधरकाननलीनो, दुःखविनिर्गतवाष्पोत्पीडः।
दूरोत्सारितहृदयानन्दो, ऽवरमानेन भ्रमति गजेन्द्रः।

(२) हेरे, हेरे, परभृते, मधुरप्रलापिनी कान्ता नन्दनवने स्वच्छन्दं भ्रमन्ती,
यदि परं प्रियतमा सा मम दृष्टा, तदाचक्ष्व मह्यं, परपुष्टे।

* खुरके नृत्यविशेषः।

Digitized by Google

॥ एतदेव नर्त्तिला * वल्गितकोपसूचय जानुभ्यां स्खिला ॥ भवति;

त्वां कामिनो मदनदूतिमुदाहरन्ति;
मानापमाननिपुणं त्वमसीदमस्मं।
तामानय प्रियतमां मम वा समीपं,
मां वा नयाशु, मृदुभाषिणि, यत्र कान्ता।

॥ वामकेन * किञ्चिद्वलिता आकाशे; किमाह भवती! कथंलामेवानुरक्तमपहाय गतेति?॥ अयतोऽवलोक्य॥ भवति;

कुपिता, न तु कोपकारणं सदृदयात्मागतं स्मरास्यहं,
प्रभुता रमणेषु योषितां न हि भावस्खलितान्यपेक्षते।

॥ ससम्भ्रममुपविश्य ॥

॥ अनन्तरं जानुभ्यां स्खिला कुपितेति पठित्वा विलोक्य॥ कथं कथाविच्छेदकारिणी, स्वकार्य्ये व्यासक्ता। अथ वा सुष्ठु स्खिद्यते।

महदपि परदुःखं प्रीतसं सम्यगाद्यः।
प्रणयमगणयित्वा यन्ममापङ्गतस्य,
अधरमिव, मदान्धा पातुमेषा प्रवृत्ता
फलमभिनवपाकं राजजम्बूद्रुमस्य।

---

* वल्गितका रागोपाङ्गविशेषः।

* वामकं वामाङ्गपार्श्वस्थितवस्त्ववलोकनसंस्थानविशेषः यदुक्तं

धुतेन शिरसा चक्षुः, पार्श्वेन, वलितेन च,
तद्वामकं वै करणं, पार्श्वस्थस्यावलोकने

Digitized by Google

तद्देवं गतेऽपि प्रियेव मे मच्चुखनेति ; न कोपोऽस्यां, सुख मास्यां ; भवतीं साधयामस्यावत्।

॥ उत्थाय दिपदिकया परिक्रम्यावलोक्य च ॥ अये, दक्षिणेन वनधारां प्रियाचरणविक्षेपशंसी नूपुरशब्दः। यावदेन मनुगच्छामि।

प्रियतमा विरहक्लान्तवदनः,
अविरलवाष्पजलाकुलनयनः।
दुःसहदुःखविसंष्ठुलगमनः,
प्रसृतोरुतापदीनाङ्गः
अधिकं दूनमानसो हरीगतः
कानने परिभ्रमति गजेन्द्रः (१)।

* ककुभेन। षडुपभङ्गाः॥ अनन्तरं दिपदिकया दिशोऽवलोक्य॥

---

(१) प्रियतमाविरहक्लान्तवदनः,
अविरलवाष्पजलाकुलनयनः।
दुःसहदुःखविसंष्ठुलगमनः,
प्रसृतोरुतापदीनाङ्गः
अधिकं दूनमानसो हरीगतः
कानने परिभ्रमति गजेन्द्रः।

---

* ककुभोरागविशेषः षट् उपभङ्गा अवछेदाः।

Digitized by Google

प्रियकरिणीविच्छेदितो, गुरुशोकानलदीप्तिभिः,
वाष्पजलाकुललोचनः करिवरोभ्रमति समाकुलः (१)।

॥ सकरुणं ॥ हा धिक् कष्टं !

मेघश्यामादिशोदृष्ट्वा, मानसोत्सुकचेतसा,
कूजितं राजहंसेन, नेदं नूपुरशिञ्जितं।

॥ इति पठित्वोत्थाय ॥ भवतु, यावदेते मानसोत्सुकाः पतत्रिणः सरसोऽस्मात्पतन्ति, तावदेतेभ्यः प्रियाप्रवृत्तिमार्गमवेयं ॥ वल्कलिकयोपसृत्य, जानुभ्यां स्थित्वा, ॥ हंहो जलविहङ्गमराज;

पश्चात् सरः प्रतिगमिष्यसि मानसं त्वं,
पाथेयमुत्सृज विसं ग्रहणाय भूयः;
मार्गावदुद्धुर शुचोदयिताप्रवृत्त्या,
स्वार्थात् सतां गुरुतरा प्रणयिक्रियैव।

॥ तिर्य्यगवलोक्य ॥ अये, यथोन्मुखमालोकयति, तथा वक्तुं सोत्सुकमनसा मया दृष्टेत्याह।

॥ उपविश्य; सचकितं ॥ अरेरे, हंसा किं गोदृश्यद्रे? (२)

॥ इति नर्त्तित्वा उत्थाय ॥

---

(१) प्रियकरिणीविच्छेदितो, गुरुशोकानलदीप्तः,
वाष्पजलाकुललोचनः करिवरोभ्रमति समाकुलः

(२) अरेरे हंसाः, किं गोप्यते?

Digitized by Google

यदि, हंस, गता न ते नभूः सरसोरोधसि दृक्पथं प्रिया मे,
मदखेदपदं कथं नु तस्याः, सकलं चीरगतं मया गृहीतं।

गद्य अनुसारे मद्द लक्खिअद्द (१)।

॥ चर्चरिकयोपसृत्य अञ्जलिं बद्ध्वा ॥

हंस, प्रयच्छ मे कान्तां, गतिरत्नास्त्वया हृता'
विभावितैकदेशेन देयं यदभियुज्यते।

॥ पुनश्चर्चरी ॥ कद्द पुंद्द विक्खिअ उए गद्दरत्नास्त्व (२)।

॥ पुनश्चर्चरी ॥ सानुनयं हंसप्रयच्छेत्यादि पठित्वा ॥ पुनश्चर्चरिकया साक्षेपं ॥ हंस प्रयच्छेत्यादि पठित्वा, द्विपदिकया निरूप्य ॥ एषसेनानुरागी राजेत्यतिभयादुत्पतितः यावदन्यमवकाशमवगाहिष्ये ॥ द्विपदिकया परिक्रम्यावलोक्य च ॥ अये, प्रियासहायश्चक्रवाकस्तिष्ठति, यावदेनं गच्छामि।

॥ अनन्तरे कुटिलिका ॥ *

मन्मररणिअमणोहरए॥ मन्दघटी॥कुसुमिअतरुवरपल्लविए,*

---

(१) गत्यनुसारेण मया लक्ष्यते।

(२) कुत्र त्वया निक्षिप्तमिदं गतिरत्नास्त्वं।

---

* कुटिलिका नाट्यविशेषः।

* मन्दघटी नाट्यविशेषः।

Digitized by Google

॥ चर्चरी॥ दइआविरहुम्मादइओ, कानने भमइ गइन्दओ(१)

॥ द्वितीयान्तरे ॥ * ॥ चर्चरी ॥

गोरोअणकुङ्कुमवण्णा चक्का भणइ, मइ
मउवासर कीलन्ती धण्णि अ ण दिट्ठी पइं (२)।

॥ चर्चरिकयोपसृत्य जानुभ्यां स्थित्वा ॥

रथाङ्ग नाम संत्यक्तो, रथाङ्गश्रोणिबिम्बया,
अयं त्वां पृच्छति रथी, मनोरथशतैर्वृतः।
अयं कः कदुत्याह न किञ्च विदितोऽहमस्य।
सूर्य्याचन्द्रमसौ यस्य मातामहपितामहौ,
स्वयं वृतः पतिर्द्याभ्यामुर्व्वश्या च भुवा च यः।
कथं तूष्णीमेवास्से? भवदुपालम्भे तावदेनं॥ जानुभ्यां स्थित्वा॥
नयुक्तं तावदात्मानुमानेन वर्त्तितुं, यतः;
सरसि मत्तिनीपत्रेणापि त्वयावृतविग्रहां
ननु सहचरीं दूरे मत्वा विरौषि समुत्सुकः।
इति च भवतोजायास्नेहात् पृथक्स्थितिभीरुतां,
मयि च विधुरे भावः, कोऽयं प्रवृत्तिपराङ्मुखः?

(१) मर्म्मररणितमनोहरे कुसुमिततरुवरपल्लविते,
दयिताविरहोन्मादितः, कानने भ्रमति गजेन्द्रः।
(२) गोरोचनाकुङ्कुमवर्णा चक्रा भणति, मया,
मधुवासरे क्रीडन्ती धन्या न दृष्टा परं।

* नत्यगीतवाद्यानां सम्यं त्वयस्तद्व्याख्यारे।

॥ उपविश्य ॥ सर्व्वथा मदीयानां भाग्यविपर्य्ययाणामयं प्रभावः। यावदन्यमवकाशमवगाहिष्ये॥ दिष्टदिष्ट्या परिक्रम्यावलोक्य च॥ अये

दूरं रणद्धि मां पद्ममग्नःक्षणितषट्पदं,
मया दृष्टाधरं तस्याः सशीत्कारमिवाननं।

दूतोगतस्यानुनयोमाभूदित्यस्मिन्नपि कमलगते भ्रमरे प्रणयं करिष्ये ॥ अस्थानन्तरे अर्द्धद्विचतुरस्रकः॥ *

एकक्रमवर्द्धितगुरुतरप्रेमरसे,
सरे हंसयुवाणौक्रीडत् कामवशे (१)।

॥ चतुरस्रकेणोपविश्य अञ्जलिं बद्ध्वा,॥ *

---

(१) एकक्रमवर्द्धितगुरुतरप्रेमरसः।
सरसि हंसयुवा क्रीडति कामवशः।

---

* नन्द्यावर्त्तापरनामकः संस्थानविशेषो द्विचतुरस्रकः, स च द्विवारं छृतत्वादर्द्धद्विचतुरस्रकः। यदुक्तं

अक्ष्णैव चेच्चरणयोरन्तरं स्यात् यदङ्गुलं।
वितस्तिमात्रमथवा नन्द्यावर्त्तं तदुच्यते।

अक्ष्णैव प्रकृतसंस्थानस्येत्यर्थः। अयमेव चार्द्धद्विचतुरस्रकइत्याहुः।

* नन्द्यावर्त्तप्रमाणाद्धि भवेदष्टादशाङ्गुलं। अन्तर चतुरैः स्थानं चतुरस्रं तदोदितमिति।

Digitized by Google

मधुकर, मदिराक्ष्याः ग्रंथ तस्याः प्रवृत्तिं;

वरतनुरथवासौ नैव दृष्टा त्वया मे,

यदि सुरभिमवाप्यस्तन्मुखोच्छ्वासगन्धं,

तव रतिरभविष्यत् पुष्करीके किमस्मिन्।

॥ इति द्विपदिकया परिक्रम्यावलोक्य च ॥

अये, करिणीसहायो नागाधिराजो नीपस्कन्धनिषण्ण इति; यावदेनं गच्छामि।

करिणीविरहसन्तापितः कानने गन्धोद्धुतमधुकरः।*

काणणए गन्धद्धुअमत्तकरओ (१)।

॥ अतोऽन्तरेविलोक्य ॥ अथवा न तावदयमुपसर्पणकालः।

अयमचिरोद्गतपल्लवमुपनीतं प्रियतमायहस्तेन,

अभिलषतु, तावदासवसुरभिरसं मत्तकीभृङ्गं।

॥ स्थानकेनावलोक्य ॥† अये, छताहारकः सम्वृत्तः; भवतु, समीपमस्य गत्वा, पृच्छामि।

॥ अनन्तरे चर्चरी ॥

हत्ति पत्ति पुच्छेमि, आचक्खहि, गअवरु,

ललिअपआरेण णामिअतरुअरु (२)।

(१) करिणीविरहसन्तापितः कानने गन्धोद्धुतमधुकरः।

(२) अहं त्वां पृच्छामि, आचक्ष्व, गजवर,

ललितप्रहारेण नामिततरुवर;

* रागभेदः।

† स्थानकमालापविशेषः।

Digitized by Google

दूरविनिर्जितशशधरकान्ती
दृष्टा प्रिया मया सम्मोहयन्ती (१)।

॥ पदद्वयं पुरतउपसृत्य ॥

मदकलयुवतिप्रमृतिकलागजयूथपयूथिकाप्रलकेशी,
स्थिरयौवना स्थिता ते दूरालोके सुखालोका।

॥ सहर्षमाकर्ण्य ॥ अहह, अनेन प्रियोपलब्धिप्रसंगिना मद्भ कण्ठगर्ज्जितेन समाश्वासितोऽस्मि। साधर्म्याद्भूयसी मे त्वयि प्रीतिः। कथमिति!

मामाहुः पृथिवीभुजामधिपतिं नागाधिराजो भवान्,
अव्युच्छिन्नपृथुप्रवृत्ति भवतोदानं समानं मम;
स्त्रीरत्नेषु ममोर्व्वशी, प्रियतमा, यूथे तवेयं वशा,
सर्व्वं मामनु ते प्रियाविरहजां लम्भु व्यथां मानुभूः।

सुखमास्तां भवान्॥ द्विपदिकया परिक्रम्यावलोक्य च॥ अये, अयमसौ सुरभिकन्धरो नाम विन्ध्येषरमणीयः सानुमान्, प्रिय स्वाप्नरसं अपि नाम सुतनुरक्षोपत्यकायामुपलभ्येत॥ परिक्र म्यावलोक्य च,॥ कथमन्धकारः? भवतु; विद्युत्प्रकाशेनावलोक यामि। कथं मदीयैर्दुरितपरिणामैर्मेघोदयोऽपि व्रतच्छदा शून्यः सम्वृत्तः? तथापि श्लिष्टयमेनमद्दा न निवर्त्तिष्ये।

---

(१) दूरविनिर्जितशशधरकान्ति
दृष्टा प्रिया मया सम्मोहयन्ती।

Digitized by Google

*॥ अनन्तरे खण्डिका ॥

परिअरिअखरखुरदारिअमेइणिओ वणगहणे अविअलु,
परिसप्पेइ, पेक्खइ, खीणो णिअकज्जुज्जुअ कोलु (१)।
अपि वनान्तरमल्पभुजान्तरा श्रयति पर्व्वतपर्व्वसु सन्नता,
दयमनङ्गपरिग्रहमङ्गला, पृथुनितम्ब, नितम्बवती तव।
कथं तूष्णीमेवास्ते, अहो विप्रकर्षान्न शृणोति। भवतु समीप
मस्य गत्वा पृच्छामि॥ अनन्तरे चर्चरी॥

फलिअसिलाअलणिम्मलनिज्झरु, वज्जुविअकुसुमेविरइअसेहरु,
किन्नरमहुरुग्गीअमनोहर, देक्खावहि मज्झ पिअअम,
महिहरु (२)।

॥ चर्चरिकयोपसृत्याञ्जलिं बद्ध्वा॥

सर्व्वक्षितिभृतान्नाथ, दृष्टा सर्व्वाङ्गसुन्दरी,
रामा रम्ये वनान्तेऽस्मिन्मया विरहिता नु या?

नथैव प्रतिशब्दं शृणोति॥ आकर्ण्य सहर्षं॥ कथं, यथाक्रमं दृष्टेत्याह, भवत्यवलोकयामि॥ दिशोऽवलोक्य सखेदं॥ कथं, ममैवायं कन्दरान्तरविसर्पी प्रतिशब्दइति॥ मूर्च्छति॥

(१) प्रसृतखरखुरदारितमेदिनीको वनगहने अविचलः
परिसर्पति, पश्यत, क्षीणो निजकार्य्योद्युक्तः कोलः।

(२) स्फटिकशिलातलनिर्म्मलनिर्झर, वज्रविधकुसुमै
र्विरचितशेखर,
किन्नरमधुरोद्गीतमनोहर, दर्शय मम प्रियतमां, महीधर।

* खण्डिका गीतिविशेषो गद्यविशेषो वा।

Digitized by Google

॥ उत्थायोपविश्य सविषादं, ॥ अहह श्रान्तोऽस्मि यावदस्यां गिरिनद्यास्तीरे तरङ्गवातमासेविष्ये।

॥ दिष्टद्दिष्ट्या परिक्रम्यावलोक्य च ॥ इमां नवाम्बुकलुषां स्रोतोवहां पश्यता मया रतिरुपलभ्यते। कुतः।

तरङ्गभ्रूभङ्गा, क्षुभितविहगश्रेणिरसना,
विकर्षन्ती फेणं वसनमिव संरम्भशिथिलं;
यथा जिह्मं याति स्खलितमभिसन्धाय वञ्चनो,
नदीभावेनेयं ध्रुवमसहमाना परिणता।
भवतु; प्रसादयामि तावदेनां।
पसिअ, पिअअम, सुन्दरि, एणए,
खुहिअकरणविहङ्गमएणए,
सुरसरितीरसमूसुअएणए,
अलिउलझंकारिअएणए (१)।

॥ तेनाकुटिलिकान्तरे चर्चरी॥

---

(१) प्रसीद, प्रियतमे, सुन्दरि, एतस्मिन्
क्षुभिता करेण विहङ्गमेनके,
सुरसरित्तीरसमुत्सुकेनके,
अलिकुलझङ्कारितेन ते।

Digitized by Google

पुव्वदिसापवणाहअकल्लालुग्गअवाहओ,
मेहंगे णच्चइ सललिअं जलणिहिणाहओ
हंसरहङ्गसङ्गकुङ्कुमकराभरणु,
करिमअराउलकसणकमलकआवरणु,
वेलासलिलुव्वेल्लिअहत्थदिण्णतालु
ओत्थरइ दसदिसु दम्भेदणवमेहआलु (१)।

॥ चर्चरिकयोपसृत्य आनुभ्यां स्थित्वा ॥

त्वयि निबद्धरतौ, प्रियवादिनि, प्रणयभङ्गपराङ्मुखचेतसि, कमपराधमवं मयि पश्यसि, त्यजसि, मानिनि, दासजनं? यतः, कथं तूष्णीमेवास्से? अथवा परमार्थतः सरिदियं नोर्व्वशी, अन्यथा कथं पुरूरवसमपहाय समुद्राभिसारिणी भवेत्; अनिर्व्वेदप्राप्याणि श्रेयांसि; भवतु, तमेवोद्देशं गच्छामि, यत्र मे नयनयोः सा सुनयना तिरोहिता॥ परिक्रम्यावलोक्य च॥ इयं तावल्लियाप्रवृत्तये सारङ्गमालोकमभ्यर्थये।

---

(१) पूर्व्वदिक्पवनाहतकल्लोलोद्गतवाङ्मः,
मेघाङ्गैर्नृत्यति सललितं जलनिधिनाथः;
हंसरथाङ्गभङ्गकुङ्कुमकृता भरणः,
करिमकराकुलकृष्णकमलकृतावरणः;
वेलासलिलोद्वेल्लितहस्तदत्तताल:,
अवस्तृणाति दशदिशोरभ्रा नवमेघकालः।

Digitized by Google

अभिनवकुसुमस्तवकिततरुवरस्य परिसरे,
मदकलकोकिलकूजितवरझङ्कारमनोहरे,
नन्दनविपिने, निजकरिणीविरहानलेन सन्तप्तो,
विचरति गजाधिपतिरैरावतनामा।

* गलितकः ॥ जानुभ्यां स्थित्वा ॥

कृष्णसारकविर्योऽयं दृश्यते काननश्रिया,
नवशस्यावलोकाय कटाक्षदव पातितः।

॥ विलोक्य ॥

अयमल्लिकमायान्तीं शिखण्डिना स्तनपायिना,
अनन्यदृष्टिस्तामेव मृगीं रुद्धाग्निरीक्षते।

॥ इति चर्चरी ॥

सुरसुन्दरी, जघणभरालस, पीणुत्तुङ्गघणत्थणी,
थिरजोव्वन तणुअसरीरि, हंसगइ,
गअणुज्जलकाणणे, मिअलोअणि भमन्ते,
दिट्ठु पिअ? तइ विरहसमुद्दन्तरे उत्तारहि मज्झ (१)।

॥ उपसृत्याञ्जलिं बद्ध्वा ॥ हंहो हरिणपते,

---

(१) सुरसुन्दरी, जघणभरालसा; पीनोत्तुङ्गघनस्तनी
स्थिरयौवना तनुशरीरा, हंसगतिः,
गगणोज्ज्वलकानने, मृगलोचना भ्रमन्ती,
दृष्टा त्वया? तद्विरहसमुद्रान्तरादुत्तारय मां।

---

* गलितको नाट्यविशेषः।

Digitized by Google

अपि दृष्टवानसि मम प्रियां वने, कथयामितेतदुपलक्षणं, शृणु;
पृथुलोचना, सहचरी यथैव ते सुभगा, तथैव खलु सापि वीक्ष्यते।

॥ विलोक्य ॥ कथमनादृत्य मद्वचनं, कलचाभिमुखं स्थितः,
सर्व्वथा उपपद्यते परिभवास्पदं, विधिविपर्य्ययः।

यावदन्यमवकाशमवगाहिष्ये॥ परिक्रम्यावलोक्य च॥ हन्त,
दृष्टमुपलक्षणं तस्या मार्गस्य।

रक्तकदम्बः सोऽयं प्रियया घर्म्मार्त्तशंसि' यस्येदं,
कुसुममसमग्रकेशरविषममपि कृतं शिखाभरणं।

॥ परिक्रम्यावलोक्य च॥ तत्किं नु खलु शिखाभेदगतं नितान्तं
रक्तमिदमवलोक्यते?

प्रभालेपी नायं हरिदहितगजस्यामिषरुचः?
स्फुलिङ्गः स्यादग्नेर्दहनमभिदृष्टं पुनरिदं?
अथे रक्ताशोकस्तवकसमरागो मणिरयं,
यमुद्धर्त्तुं पूषा व्यवसित इवालम्बितकरः।
मवलादास्यतात्॥ यहणं नाटयति॥

पणइणिवद्धासादिओ वाहाउलणिअणअणओ,
गअवइ गहणे दुहिअओ परिभमइ किलामिअवअणओ (१)॥

---

(१) प्रणयिनीबद्धासादितो वाष्पाकुलनिजनयनः।
गजपतिर्गहने दुःखितः परिभ्रमति क्लान्तवदनः।

Digitized by Google

॥ द्विपदिकयोपसृत्य गृहीत्वात्मगतं ॥

मन्दारपुष्पैरधिवासितायां यस्याः शिलायामयमर्पणीयः,
सैव प्रिया संप्रति दुर्लभा मे मैवैनमभ्यूपहतं करोमि ।

॥ इत्युत्सृजति ॥

॥ नेपथ्ये, वत्स, गृह्यतां ; वत्स गृह्यतां ॥

सङ्गमनीयो मणिरिह, शैलसुताचरणरागयोनिरयं,
आवहति धार्य्यमाणः सङ्गममाशु प्रियाजनेन ।

राजा ॥ ऊर्द्धमवलोक्य ॥ कोमामनुशास्ति ? ॥ विलोक्य ॥ कथं भगवान् मृगराजधारी ! भगवन्ननुगृहीतोऽहममुनोपदेशेन ।

॥ मणिमादाय ॥ हंहो सङ्गमणे।

तया विमुक्तस्य निमग्नमध्यया भविष्यसि त्वं यदि सङ्गमाय मे,
ततः करिष्यामि भवन्तमात्मनः शिखामणिं वासमिवेन्दुमीश्वरः।

॥ परिक्रम्यावलोक्य च ॥ तत्किं खलु कुसुमरहितामपि लतामिमां पश्यता मया रतिरुपलभ्यते ; अथवा स्थाने मम मनो रमते दृश्यं हि ।

तन्वी मेघजलार्द्रपल्लवतया धौताधरेवाश्रुभिः,
शून्येवाभरणैः स्वकालविरहादिष्टानपुष्पोद्गमा ।
चिन्तामौनमिवाश्रिता मधुलिहां शब्दैर्विना लक्ष्यते,
चण्डी मामवधूय पादपतितं याता प्रकुप्येव सा ।

यावदस्यां प्रियानुकारिण्यां लतायां परिष्वङ्गप्रणयी भवामि ।

Digitized by Google

अए, पेक्ख, विणइदहिअए भवामि ;
जइ विहिजोए पुणु तहिँ पाविमि,
ता रत्ते वि ण करेमि णिब्भन्ती,
पुणु णइ मेल्लइ ताह कअन्ती (१)।

॥ इति चर्चरिकयोपसृत्य, लतामालिङ्गति ॥

ततस्तदीयस्थानमाक्रम्यैव प्रविष्टोर्व्वशी।

राजा ॥ निमीलिताक्षः स्वर्गं नाटयित्वा ॥ अये, उर्व्वशी गाढस्वर्गादिव निर्दृतं मे हृदयं; न पुनरस्ति विश्वासः। कुतः समर्थये यत्प्रथमं प्रियां प्रति,क्षणेन तन्मे परिवर्त्ततेऽन्यथा, अतो विनिद्रे सहसा विलोचने करोमि न स्वर्गविभावितप्रियः।

॥ शनैरुन्मील्य चक्षुषी ॥ कथं सत्यमेवोर्व्वशी॥ इति मूर्छितः पतति॥

उर्व्व। समस्सस दु, समस्सस दु, महाराओ (२)।

---

(१) लते, प्रेक्षस्व विनष्टहृदयो भवामि,
यदि विधियोगे पुनस्तां प्राप्नोमि;
तदारब्धेऽपि न करोमि निर्भ्रान्तिं,
पुनर्नहि प्रवेक्ष्यामितां लतान्तां।

(२) समाश्वसितु, समाश्वसितु, महाराजः।

राजा ॥ संज्ञां लब्ध्वा ॥ प्रिये, अयं जीवितं।

लब्धियोगभवे, चक्षि, मया तमसि मज्जता,

दिष्ट्या प्रत्युपलब्धासि, चेतसेव मतासुना।

उर्व्वः। मरिसदु महाराओ, जं मए कोववसं महाए अवत्थन्तरं पाविदो महाराओ (१)।

राजा। नाहं प्रसादयितव्यस्त्वया, त्वद्दर्शनेन प्रसन्नोमे सर्वात्मा नरात्मा; कथय, कथमियन्तं कालं मया विरहिता स्थितासि?

॥ अनन्तरं चर्चरी ॥

भोरा परभृअ हंस रहंगम्

अलि गअ पव्वअ सरिअ कुरङ्गम्,

तुज्झहु कारण रण्ण भमन्ते,

को ण उ पुच्छिअ मज्झि रोअन्ते (२)।

उर्व्वः। एवं अन्तःकरणपवत्तीकिदवुत्तन्तो महाराओ (३)।

राजा। प्रिये, अन्तःकरणमिति न खल्ववगच्छामि।

---

(१) मर्षयतु महाराजो, यन्मया कोपवशं गतया अवस्थान्तरं प्रापितो महाराजः।

(२) भयूर परभृत हंस रथाङ्गम्

अलि गज पर्व्वत सरित् कुरङ्गम्,

तव निमित्तमरण्ये भ्रमता,

को न खलु पृष्टो मम रुदन्त।

(३) एवमन्तःकरणप्रत्यक्षीकृतवृत्तान्तो महाराजः।

Digitized by Google

उर्व्व। सुणादु महाराओ; पुरा भगवदा महासेणेण आसदं कुमारव्वदं गेण्हिअ, अअं सअलकलुसो णाम गन्ध मादणकच्छो अज्झासिदो, किदा च त्थिदी (१)।

राजा। कीदिसी?।

उर्व्व। जा किल इत्थिआ इमं पदेसं आगमिस्सदि, सा लदाभावे परिणदरूआ भविस्सदि; गोरीचरणरागसम्भवं मणिं वज्जिअ अ लताभावं ण मोच्छिस्सदित्ति। तदो अहं गुरुआवसंमूढहिअआ, विसुमरिददेवदाणिअमा, अन्नकाजणपरिहरणीअं कुमारवणं पविट्ठा; पवेसाणन्तरञ्च काणणोवन्तवत्तिणा लदाभावेण परिणदं मे रूअं (२)।

राजा। प्रिये, सर्व्वमुपपन्नं।

---

(१) शृणोतु महाराजः, पुरा भगवता महासेनेन आश्रमं कुमारव्रतं गृहीत्वा, अयं सकलकलुषो नाम गन्ध मादनकच्छोऽध्यासितः, कृता च स्थितिः।

(२) या किल स्त्री इमं प्रदेशमागमिष्यति, सा लताभावे परिणतरूपा भविष्यति, गौरीचरणरागसम्भवं मणिं वर्जयित्वा च लताभावं न मोक्ष्यतीति। ततोऽहं गुरुशापसंमूढहृदया, विस्मृतदेवतानियमा, कन्यकाजनपरिहरणीयं कुमारवनं प्रविष्टा; प्रवेशानन्तरञ्च काननोपान्तवर्त्तिना लताभावेन परिणतं मे रूपं।

Digitized by Google

रतिखेदसुप्तमपि मां त्यजने या मन्यसे प्रवासमतं,
सा लभिहैतदवस्थं कथं सहेथास्थिरविरोगं।

इदमेतद्यथा कथितं सङ्गमनिमित्तं पुनरुपलब्धिप्रभाव मन्त्राभिरिति ॥ मणिं दर्शयति ॥

उर्व्व। कधं, अम्हो, सङ्गमणीओ अअं मणी; अदोअ्येव्व महाराएण आलिङ्गिदअ्येव पदुदत्थाहि सम्पुत्ता (१)।

राजा ॥ ललाटे मणिं सन्निवेश्य ॥

स्फुरता विच्छुरितमिदं रागेण, मणेर्ललाटनिहितस्य,
श्रियमुद्वहति मुखं ते, वालातपरक्तकमलस्य।

उर्व्व। पियम्वद, महन्तो खु कालो अम्हाणं पदट्ठाणदो णिग्गदाणं, कदाइ अम्हदस्सन्ति पदट्ठीओ; एहि, गच्छम्ह (२)।

राजा। यदाह भवती ॥ इत्युत्तिष्ठतः ॥

उर्व्व। अध कधं उण महाराओ गन्तुमिच्छदि (३)।

---

(१) कथं सङ्गमनीयोमणिः अतएव महाराजेनालिङ्गितेव प्रकृतिस्थास्मि संवृत्ता।

(२) पियम्वद, महान् खलु कालआवयोः प्रतिष्ठाना निर्गतयोः, कदाचिदस्मद्विध्यन्ति प्रकृतयः; तदेहि, गच्छावः।

(३) अथ कथं पुनर्महाराजोगन्तुमिच्छति?

Digitized by Google

राजा। अचिरप्रभाविलसितैः पताकिना,
सुरकार्मुकाभिनवचित्रशोभिना,
गमितेन खेचरगमने विमानतां,
नय मां नवेन वसतिं पयोमुचा।

॥ चर्चरी ॥

पाविअसहअरिसङ्गमओ पुलअपसाहिअअङ्गओ,
सेच्छापत्तविमाणओ विहरदु हंसजुआणओ (१)।

॥ इति खड्गधारया निष्क्रान्तौ ॥

॥ चतुर्थोऽङ्कः ॥

---

(१) प्राप्तसहचरीसङ्गमः, पुलकप्रसाधिताङ्गः,
स्वेच्छाप्राप्तविमानो विहरति हंसयुवा।

Digitized by Google

अथ पञ्चमाङ्कः।

ततः प्रविशति हृष्टो विदूषकः।

विदू। ही ही भो भो! दिट्ठिआ चिरस्स कालस्स उव्वशी सहाओ तत्थभवं राआ, णन्दणवणप्पमुहेसुं पदेसेसुं विहरिअ, पडिणिउत्तो णअरं; दाणीं सकज्जाणुसासणे पकदिमण्डलं अणुरञ्जअन्तो रज्जं करेदि। आं, सन्तापअं वज्जिअ ण से किञ्चि सेसणीअं। अज्ज दिधिविसेसेत्ति भअवदीणं गङ्गा जमुणाणं सङ्गिसेसुं, देवीए सह किदाभिसेओ, संपअं उवआरिअं पविट्ठो, ता जाव अलङ्करणीअमाणस्स अङ्गाणुलेवणवङ्गभाइं अन्तरे होमि (१)।

---

(१) आश्चर्यं भो! दिष्ट्या चिरस्य कालस्य उर्व्वशीसहाय स्तत्रभवान् राजा, नन्दनवनप्रमुखेषु प्रदेशेषु विहृत्य, प्रतिनिवृत्तो नगरं; इदानीं स्वकार्य्यानुशासने प्रकृतिमण्डलमनुरञ्जयन् राज्यं करोति। आं, सन्तापं वर्जयित्वा नास्य किञ्चित् शोचनीयं। अद्य च तिथिविशेषइति भगवतीगङ्गायमुनयोः सङ्गिसेषु, देव्या सह कृताभिषेकः; साम्प्रतं उपकारिकां प्रविष्टः, तावदलंक्रियमाणस्य अङ्गानुलेपनवङ्गभाभिः अन्तरे भवामि।

Digitized by Google

नेपथ्ये। हद्धी हद्धी! एष ज्वलन्रक्ततालवेल्लपिधाणं णिक्खिविअ णीअमाणो, अक्करा विरहिदेण मउलिरअणदाए पओदो मणी आमिससंकिणा गिद्धेण भक्खिदो (१)।

विदू॥ आकर्ण्य॥ अत्थाहिदं परमवड्ढमदो खु सो वअस्सस्स, सङ्कमणीओ णाम चूडामणी; अदो खु असमत्तणेवक्खोज्जेव तत्थभवं आसणादोज्जेव उत्थिदो,ता पासपलिवत्ती होमित्ति (२)॥ निष्क्रान्तः। प्रवेशकः॥

॥ ततः प्रविशति राजा सूतश्च, कञ्चुकिरेचकौ परिजनश्च॥

राजा। रेचक, रेचक,

आत्मनोवधमाहर्त्तुं कोऽसौ विहगतस्करः,
येन तत् प्रथमं स्तेयं गोप्तुरेव गृहे कृतं?

---

(१) हा धिक् हा धिक्! एष ज्वलन् रक्ततालवृन्तपिधानं निक्षिप्य नीयमानो ऽस्थिरोविरहितेन मौलिरत्नतया प्रभो जितो मणिरामिषशङ्किना गृध्रेण भक्षितः।

(२) अत्याहितं परमवर्द्धमतः खलु स वयस्यस्य सङ्क्रम नीयो नाम चूडामणिः; अतः खलु असमाप्तनेपथ्यएव तच्च भवानासनादेव उत्थितः तस्मात् पार्श्वपरिवर्त्ती भवामि इति।

Digitized by Google

किरातः। एषो अग्गमुहकोडिलग्गासुत्तेण मणिणा, अणुरञ्जन्तो विअ, आआसं परिब्भमदि (१)।

राजा। पश्यास्येनं।

अयं मुखालम्बितहेमसूत्रं विभ्रन्मणिं मण्डितमौग्र्यचारः,
अज्ञातचक्रप्रतिमं विहङ्गस्तद्रागलेखावलयं तनोति।

कथय, किं खल्वत्र कर्त्तव्यं?

विदू। अलं एत्थ घिणाए, एस अवराही आसणीओ (२)।

राजा। सम्यगाह भवान्; धनुर्धनुस्तावत्।

परिजनः। जं भट्टा आणावेदि।

॥ इति निष्क्रान्तः ॥

राजा। न दृश्यते हि विहगाधमः।

विदू। दट्ठो दट्ठो, दक्खिणन्तरेण चलिदो सउण दट्ठाओ (३)।

राजा॥ दृष्टा॥ दृष्टार्गो,

प्रभापल्लवितेनासौ करोति मणिना खगः
अशोकस्तवकेनेव दिङ्मुखस्तावतंसकं।

---

(१) एषोऽयमुखकोटिलग्नसूत्रेण मणिनानुरञ्जयन्निवा काशं परिभ्रमति।

(२) अलमत्र घृणया, एषोऽपराधी त्रासनीयः।

(३) दृष्टदृष्टो, दक्षिणान्तरेण चलितः शकुनर्हताशः।

Digitized by Google

॥ प्रविश्य ॥ धनुर्ईस्ता यवनी। भट्टा, एदं सयरं चावं।

राजा। किमिदानीं धनुषा; वाणपथातीतः कृतभोजनः।

तथाहि।

आभाति मणिविशेषो दूरमिदानीं पतत्रिणा नीतः,
नक्तमिव रोहिताक्षः परुषघनच्छेदसंपृक्तः।

आर्य्य ताडय।

कञ्चु। यथाज्ञापयति देवः।

राजा। मदर्शनादुच्छ्वसन्तां नागरिकाः। सायन्तिवासवृक्षाग्रे विश्रीयतां विहगाधमः।

कञ्चु। यथाज्ञापयति देवः॥ इति निष्क्रान्तः॥

विदू। भो विसमीअदु भवं सयलं; कहिंपि गदो मणिकुम्भीलओ भवदोसासणादो ण मोक्खदि (१)।

॥ इत्युपविष्टः॥

राजा। वयस्य।

---

(१) विश्राम्यतु भवान् साम्प्रतं; कुत्रापि गते मणिकुम्भी रक्षः भवतः त्रासनात् न मोक्ष्यति।

Digitized by Google

सारङ्गव मे तस्मिन् मणौ प्रयासो विहङ्गमाविष्टे,
प्रियया तेनास्मि, सखे, सङ्गमनीयेन सङ्गमितः।

॥ प्रविश्य कञ्चुकी। जयति जयति देवः।

अनेन, निर्भिन्नतनुः स बभ्रुः, रोषेण ते मार्गवतां गतेन,
प्राप्तापराधः सहसान्तरीक्षात्समौक्तिरक्तः पतितः पतत्री।

॥ सर्वे विस्मयं रूपयन्ति ॥

कञ्चु। अभिप्रज्ञापितोऽयं मणिः कस्मै प्रहीयतां।

राजा। गच्छ, कोषपेटके स्थापयैनं।

किरातः। जं महा आणवेदि॥ इति मणिमादाय निष्क्रान्तः॥

राजा॥ ताम्रव्यं प्रति॥ सखे, जानाति भवान् कस्यायं वाणइति।

कञ्चु। नामाङ्कितोऽस्यते नाम्नि मे वर्णविभावनसक्ता दृष्टिः।

राजा॥ तदुपश्लेषय मूर्धं यावन्निरूपयामि।

विदू। किं भवं विआरेदि (१)।

राजा। शृणु तावत् प्रहर्त्तुर्नामाक्षराणि।

विदू। अवहिदोम्हि।

---

(१) किं भवान् विचारयति।

Digitized by Google

राजा। वाचयति।

उर्वश्यासम्भवस्यायमैलस्यानोर्धनुव्रतः

कुमारस्यायुषोवाणः संहर्त्ता दिषदायुषां।

विदू। दिट्ठिआ सम्माणेण वड्ढदि भवं (१)।

राजा। कथमेतत्, सखे? अन्यच नैमेषेयसचादभियुक्तोऽहमुर्व्वश्या, न कदाचिदपि तच भवती गर्भाभिभूतदोहदाप्युपलक्षिता; कुतएव प्रसूतिः? किन्तु;

आनीलचूषकाग्रं, लवलीफलपाण्डुराननच्छायं,

कतिचिद्दिनानि शरीरं स्तनयुगलमिवाभवत्तस्याः।

विदू। मा भवं मानुसीधम्मं उव्वसीए सम्भावदु, पभावगूढाइं देवचरिदाइं (२)।

राजा। अस्तु तावदेवं यथाह भवान्। अच सम्भरणे किमिव कारणं तस्याः?

विदू। मा वुड्ढिं मं राजा परिहरिस्सदित्ति (३)।

---

(१) दिष्ट्या सम्मानेन वर्द्धते भवान्।

(२) मा भवान् मानुषीधर्म्मं उर्व्वश्याः सम्भावयतु प्रभावगूढानि देवचरितानि।

(३) मा वृद्धां मां राजा परिहरिष्यतीति।

Digitized by Google

राजा। कृतं परिहासेन, चिन्त्यतां।

विदू। को देव्वरहस्सारं चिन्तिस्सदि।

॥ प्रविश्य कञ्चुकी ॥ जयति जयति देवः। एषा खलु चवना श्रमाद्भार्गवी कुमारमादायायाता तापसी देवं द्रष्टुमिच्छति।

राजा। उभयमप्यविलम्बं प्रवेश्यम्।

॥ कञ्चुकी तथेति निर्गत्य तापसीसहितं कुमारमादाय प्रविष्टः ॥

विदू। णं क्खु एसो खत्तिअकुमारओ, जस्स नामङ्किदो गिद्धलक्खवेही णाराओ; तधाहि वड्ढत्थं भवदो अनुकरेदि(१)।

राजा। एवमेतत्।

वाष्पायते निपतिता मम दृष्टिरस्मिन्,
वात्सल्यवन्दि हृदयं मनसः प्रसादः
सञ्जातवेपथुभिरुज्झितधैर्यवृत्तं
मिश्रामि दीर्घमदयं परिरम्भमङ्गैः।

॥ उपसृत्य ॥ भगवति, अभिवादये।

---

(१) ननु खलु एष क्षत्रियकुमारकः, यस्य नामाङ्कितो गृध्रलक्ष्यवेधी नाराचः; तथाहि वृद्धस्य भवतोऽनुकरोति।

Digitized by Google

ताप। महाराओ, सोमवंसधारअन्तो होहि॥ आत्मगतं॥ भो इमिणा अकधिदोवि विण्णादव्वेव इमस्स राएसिणो अत्तणो ओरसो सम्बन्धो॥ प्रकाशं॥ जाद, पणमस्स गुरुं (१)।

॥ कुमारो वाष्पगर्भं मञ्जलिं बद्ध्वा प्रणमति॥

राजा। वत्स, आयुष्मान् भूयाः।

कुमा॥ स्वगतं॥ यदि ह्यार्द्रमिदं श्रुत्वा, पिता ममायं, सुतोऽहमस्येति, उत्सङ्गे दृष्टुगां गुरुषु भवेत् कोदृशः स्नेहः।

राजा। भगवति, किमागमनप्रयोजनं?

ताप। सुणादु महाराओ; एस दीहाउ उम्मीलिद जादमेत्तोव्वेव, किम्पि णिमित्तं पेक्खिअ मम हत्थे णासीकदो; जधा, खत्तिअस्स कुलीणस्स जादकम्मादिविधाणं, तं से तत्थ भवदा चवणेण सव्वं अणुट्ठिदं, दाणिं गहिदविज्जो धणुव्वेए विणीदो (२)।

---

(१) महाराज, सोमवंशं धारयन् भव। भो अनाख्यातोऽपि विज्ञातएवास्य राजर्षेः आत्मनश्चौरसः सम्बन्धः। वत्स प्रणम गुरुं।

(२) शृणोतु महाराज; एष दीर्घायुरुन्मीलित जातमात्र एव किमपि निमित्तं प्रेक्ष्य मम हस्ते न्यासीकृतः; यथा क्षत्रियस्य कुलीनस्य जातकर्मादिविधानं तदस्य तत्रभवता च्यवनेन सर्व्वमनुष्ठितं, इदानीं गृहीतविद्यो धनुर्व्वेदे विनीतः।

Digitized by Google

राजा। समाधः खलु सम्पन्नः।

ताप। अज्ज, पुप्फफलसमित्कुसणिमित्तं इसिकुमारएहिं सह गदेण, इमिणा अस्समविरुद्धमाआरिदं (१)।

विद। कधं विअ? (२)

ताप। गहिदामिसो किल गिद्धो अस्समपादवसिहरे निलीअमाणो सकीकिदो वाणस्स (३)।

राजा। ततस्ततः।

ताप। तदो उअलद्धवुत्तन्तेण भअवदा अहं समादिट्ठा, णिप्पादेहि उव्वसीहत्थे णासत्ति; ता इच्छामि उव्वसीं पेक्खिदुं (४)।

राजा। आसनमनुगृह्यातु भवती।

॥ प्रेष्योपनीतयोरासनयोरुपविष्टौ॥ आर्ये तावत्व उर्वशीं उच्यतां।

---

(१) अद्य पुष्पफलसमित्कुशनिमित्तं ऋषिकुमारकैः सह गतेनामुना आश्रमविरुद्धमाचरितं।

(२) कथमिव?

(३) गृहीतामिषः किल गृध्र आश्रमपादपशिखरे निलीय मानो सकीकृतो वाणस्य।

(४) ततउपलब्धवृत्तान्तेन भगवताहं समादिष्टा, निष्पादयोर्वशीहस्त न्यासयति; तदिच्छामि उर्वशीं प्रेक्षितुं।

Digitized by Google

॥ कञ्चुकी तथेति निष्क्रान्तः ॥

राजा। एह्येहि वत्स।

सर्व्वाङ्गीनः स्वर्गः सुतस्य किल तेन मामुपनतेन,
प्रह्लादयन्न तावच्चन्द्रकरस्पर्शचन्द्रकान्तमिव।

ताप। जाद, णन्देहि पिदरं (१)।

॥ कुमारो राजानमुपसर्पति ॥

राजा ॥ आलिङ्ग्य ॥ वत्स, प्रियसखं ब्राह्मणं वन्दस्व।

विदू। किन्ति मे संकदि; अस्समं परिदः परिचिदा एदस्स साखामिआ (२)।

कुमा ॥ यत्तिमं ॥ तात, वन्दे।

विदू। सोत्थि भोदु दे, वड्ढदु भवं (३)।

॥ ततः प्रविशति उर्व्वशी कञ्चुकी च ॥

कञ्चु। इतस्तो भवती।

---

(१) वत्स, नन्दय पितरं।

(२) किमिति शङ्कते मां; आश्रमं परितः परिचिताश्रस्य शाखामृगाः।

(३) स्वस्ति भवतु ते, वर्द्धतां भवान्।

Digitized by Google

उर्व्वशी ॥ प्रविश्यावलोक्य च ॥ कोणु खलु एसो कणअ पीठो पविट्ठो, महाराएण संजमीअमाणसिहसङ्गो चिट्ठदि? ॥ तापसीं दृष्ट्वा ॥ अम्मादे! सच्चवदीसहिदो पुत्तको मे आउ महन्तो खलु संवुत्तो (१)।

राजा ॥ विलोक्य ॥ वत्स

दृश्यन्ते जननी प्राप्ता, तदालोकनतत्परा,
स्नेहप्रस्रवनिर्भिन्नमुद्वहन्ती स्तनांशुकं।

ताप। आदेहि, पडुपगच्छ मादरं (२)।

॥ इति कुमारेण सहोर्व्वशीमुपसर्पयति ॥

उर्व्वं। अम्मे, पादवन्दनं करोमि (३)।

ताप। वच्छे, भत्तुणो बहुमदा होहि (४)।

कुमार। आर्य्ये, अभिवादये।

उर्व्वं। वच्छ, पिदरं आराधअन्तो होहि (५)।

---

(१) कोनु खलु एष कनकपीठोपविष्टो महाराजेन संयम्य मानसिखण्डकक्लिष्टति? आश्चर्यं; सत्यव्रतीसहितः पुत्रको मे आयुः महान् खलु संवृत्तः।

(२) वत्स एहि; प्रत्युपगच्छ मातरं।

(३) आर्य्ये, पादवन्दनं करोमि।

(४) वत्से, भर्त्तुर्बहुमता भव।

(५) वत्स, पितरमाराधयन् भव।

Digitized by Google

॥ राजानं प्रति ॥ जअदु, जअदु, महाराओ।

राजा। स्वागतं पुत्रवत्यै; इतआसतां।

उर्व्व। अज्जा उअविसदु (१) ॥ सर्व्वे तथेत्युपविष्टाः॥

ताप। वच्छे, गहिदविज्जो संपअं आउधकवअधरो संवुत्तो एस, भत्तुणो दे समक्खं, निय्यादिदो मए तुह हत्थे निक्खेवो; ता विसज्जिदुमत्ताणअं दूसामि, उअरुज्झदि मे आसम वासधम्मो (२)।

उर्व्व। कामं; चिरस्स पेक्खिअ विरहुक्कण्ठिदत्तिं ण उण धम्मावरोधे वट्टिदुं गच्छदु अज्जा, पुणोवि दंसनस्स (३)।

राजा। आर्य्ये तवभवते च्यवनाय मम प्रणाममावेदयेति।

---

(१) आर्य्या उपविशतु।

(२) वत्से, गृहीतविद्यः सम्प्रतं आयुधकवचधरः संवृत्त एषः, भर्त्तुस्ते समक्षं, निर्य्यादितो मया तवहस्ते निक्षेपस्तद्विसर्ज्जितुमात्मानमिच्छामि उपरुध्यते मे आश्रमवासधर्म्मः।

(३) चिरस्य प्रेक्ष्य विरहोत्कण्ठितामिं; न पुनर्धर्म्मावरोधे वर्त्तितुं गच्छतु आर्य्या, पुनरपि दर्शनाय।

Digitized by Google

ताप। एवं भोदु।

कुमा। आर्य्ये, सत्यमेव निवर्त्तनं; इतः मामपि नेतुमर्हसि।

राजा। चरितं त्वया पूर्वस्मिन्नाश्रमपदे द्वितीयमप्यधा
रयितुं समयः।

ताप। जाद, गुरुणो वअणं अणुचिट्ठ (१)।

कुमा। तेन हि।

यः सुप्तवान् मदङ्के शिखण्डकण्डूयनोपलभ्यसुखः,
तस्मै जातकलापं प्रेषय शिखिकण्ठकं शिखिनं।

ताप। एवं करोमि।

उर्व्व। भअवदि पादवन्दणं करोमि (२)।

राजा। भवति, प्रणमामि।

ताप। सोत्थि सव्वाणं ॥ इति निष्क्रान्ता ॥

राजा। सुन्दरि।

अद्याहं पुत्रिणामग्र्यः, सुपुत्रेण तवानुना,
पौलोमीसम्भवेनेव जयन्तेन पुरन्दरः।

---

(१) वत्स, गुरोर्वचनमनुतिष्ठ।

(२) भगवति, पादवन्दनं करोमि।

Digitized by Google

विदू। भोदु; किन्नु क्खु सम्पदं तत्थभोदी अस्सुमही संवुत्ता? (१)

राजा। किं, सुन्दरि, प्ररुदितासि ममोपनीते
वंशस्खलेरधिगमात् स्फुरति प्रमोदे?
पीनस्तनोपरिनिपातिभिरर्पयन्ती
मुक्तावलीविरचना पुनरुक्तमस्रैः।

उर्व्व। सुणादु महाराओ; पढमं पुत्तदंसणसमुत्थिदेण आणन्देण आणन्दिदम्हि; दाणिं महेन्दसंकित्तणेण स अवधी मम हिअएण सुमरिदो (२)।

राजा। कथ्यतां।

उर्व्व। सुणादु महाराओ; पुरा महाराअगहिदहिअआ, गुरुसावसंमूढा, महेन्देण अवधीं कदुअ, अभ्भणुण्णादा (३)।

---

(१) भवतु; किन्नु खलु सास्रतं तत्रभवती अश्रुमुखी संवृत्ता?

(२) शृणोतु महाराजः; प्रथमं पुत्रदर्शनसमुत्थिते नानन्देनानन्दितास्मि; इदानीं महेन्द्रसंकीर्त्तनेन तदवधिर्मम हृदयेन स्मृतः।

(३) शृणोतु महाराजः; पुरा महाराजगृहीतहृदया, गुरुशापसंमूढा, महेन्द्रेण अवधिं कृत्वा, अभ्यनुज्ञाता।

Digitized by Google

राजा। कथय; किमिति?

उर्व्व। जदो सो मम पिअसहो राएसी तहं समुप्पण्णस्स पुत्तअस्स मुहं पेक्खदि, तदो मम समीवं तए आगन्तव्वंत्ति; तदो मए महाराअविओअभीरुदाए चिरआलसङ्गमणिमित्तं, भअवदो च्यवणस्स अस्समदेसे पुत्तओ अज्जाए सचवदीए हत्थे अप्पणा णिक्खित्तो; अज्ज उण पिदुणो आराहणसमत्थो संवुत्तो, त्ति काउण, णिव्वादिदो एव दीहाऊत्ति, को मे महाराएण संवासो (१)।

॥ राजा मोहमुपगच्छति ॥

सर्व्वे। आः समस्सस्सदु, समस्सस्सदु, महाराओ (२)।

कञ्चुकी। समाश्वसितु महाराजः।

---

(१) यदा स मम प्रियसखो राजर्षिस्त्वयि समुत्पन्नस्य पुत्रकस्य मुखं पश्यति, तदा मम समीपं त्वया आगन्तव्यमिति; ततो मया महाराजवियोगभीरुतया चिरकालसङ्गमनिमित्तं, भगवतश्च्यवनस्याश्रमदेशे पुत्रकमार्य्यायाः सत्यवत्याहस्ते आत्मना निक्षिप्तः; अद्य पुनः पितुराराधनसमर्थः संवृत्तइति ज्ञात्वा निर्व्यादितएष दीर्घायुरिति, कोमे महाराजेन सहसम्वासः।

(२) समाश्वसितु, समाश्वसितु, महाराजः।

Digitized by Google

विदू। अव्वम्भणं, अव्वम्भणं (१)।

राजा ॥ समाश्वस। अहो सुखप्रतिबन्धिता दैवस्य।

आश्वासितस्य मम नाम सुतोपलब्धया,
यद्यस्यया सह, शशोदरि, विप्रयोगः।
व्यावर्त्तितातपरुजः प्रथमाम्बुवृष्ट्या
वृत्तस्य वैद्युतदवाग्निरुपस्थितोऽयं।

विदू। अयं सो अत्थो अणत्थाणुबन्धओत्ति; तक्केमि अज्ज भवं देवराओ सयं अणुग्गाहदव्वो (२)।

उर्व्व। हा हदस्मि, मन्दभाइणी; किदविणअतणअस्स लभाणन्तरं, सग्गारोहणेण अवसिदकज्जा विप्पओअमुहीं मं, महाराओ समत्थइस्सदि (३)।

राजा। सुन्दरि, मामैवं।

न हि सुलभवियोगो कर्त्तुमात्मप्रियाणि,
प्रभवति परवत्ता भाजने निष्ठ भर्त्तुः।
अहमपि तव लूनावद्य विन्यस्य राज्यं,
विचरितमृगयूथान्याश्रयिष्ये वनानि।

---

(१) अव्रह्मण्यं, अव्रह्मण्यं।

(२) अयं सोऽर्थोऽनर्थानुबन्धकृदिति तर्कयामि अद्य भवान् देवराजः स्वयमनुग्राहयितव्यः।

(३) हा हतास्मि, मन्दभागिनी; हृतविनयतनयस्य लभानन्तरं, स्वर्गारोहणेन अवसितकार्य्या विप्रयोगमुखीं मां महाराजः समर्थयिष्यति।

Digitized by Google

कुमा। नार्हति तातोमहोच्चधारितायां धुरि तदन्यस्मि योजयितं।

राजा। अपि, वत्स, मामेवं।

भ्रमयति गजानन्यान् गन्धद्विपः कलभोऽपि सन्,
प्रभवतितरां वेगोद्रेकं भुजङ्गमिगोर्विषं ;
भुवमधिपतिर्वालावस्थोऽप्यलं परिरक्षितुं,
नखलु वयसा, आत्मैवायं स्वकार्य्यसहोगुणः।

आर्य्य, तावत्य।

कञ्चुकी। आज्ञापयतु देवः।

राजा। मद्वचनात् अमात्यपर्य्यंतं ब्रूहि, संक्रियतामायुष्मतोराज्याभिषेकः।

॥ कञ्चुकी दुष्यन्तेण निष्क्रान्तः॥ सर्व्वे दृष्टिविघातं निरूपयन्ति॥

राजा॥ आकाशमवलोक्य॥ कुतोनु खलु भोः विद्युत्सम्पातः

॥ निपुणमवलोक्य॥ अये भगवान्नारदः।

गौरोचनानिकषपिङ्गजटाकलापः,
संलक्ष्यते ग्रहिकलामलवीतसूत्रः,
मुक्ताफलातिशयसंभृतयौवनश्री
र्हैमः प्ररोहइव जङ्गमकल्पवृक्षः।

अर्घोऽर्घतावत्।

उर्व्व। इदं भगवद्दो अग्घं।

॥ प्रविश्य॥ नारदः। विजयतां, विजयतां, मघवन्लोकपालः।

राजा। भगवन्नभिवादये।

Digitized by Google

उर्व्व। पणमामि।

नार। अविरहितो दयिती भूयास्तां।

राजा॥ जनान्तिकं॥ अपि नामैवं स्यात्॥ प्रकाशं॥ और्व्वशेयः पुत्रो वः प्रणमति।

नार। आयुष्मानास्तामयं।

राजा। अयं विष्टरो गृह्यतां॥ सर्व्वे उपविशन्ति॥

राजा॥ सविनयं॥ किमागमनप्रयोजनं।

नार। राजन्, श्रूयतां महेन्द्रसन्देशः।

राजा। अवहितोऽस्मि।

नार। प्रभावद्भी मघवा वनगमनाय कृतबुद्धिं भवन्तं मनुशास्ति।

राजा। किमाज्ञापयति।

नार। त्रैलोक्यदर्शिभिरादिष्टः, सुरासुरविमर्दोभावी भवांस्तु सांयुगीनः सहायसीन न त्वया शस्त्रन्यासः कर्त्तव्यः; दूयश्च उर्वशी यावदायुषमी धर्मचारिणी भवतिति।

उर्व। अस्त्वेवं; यस्मिन्न हिमन्नादौ अवनीदं (१)।

राजा। परमनुगृहीतोऽस्मि परमेश्वरेण।

---

(१) शस्त्रमिव हृदयादपनीतं।

Digitized by Google

नार। युक्तं।

तव कार्य्यमयो कुर्य्यात्, लब्ध तस्येष्टकार्य्यकृत्,
सूर्य्यः समर्द्धयत्यग्निमग्निः सूर्य्यं स्वतेजसा।

॥ आकाशमवलोक्य ॥ रम्भे, उपनीयतां मन्त्रेण सम्भृतः कुमारस्याभिषेकः।

॥ प्रविश्य रम्भा ॥ अयं से अभिसेअसम्भारो (१)।

नार। उपवेश्यतामयमायुष्मान् भद्रपीठे।

॥ रम्भा कुमारं भद्रपीठे उपवेशयति ॥

नार। स्वस्ति भवते।

राजा। वंशवर्द्धनो भव।

उर्व। पिदुणो दे वअणाणि होन्तु (२)।

॥ नेपथ्ये वैतालिकद्वयं॥

प्रथमः। अमरमुनिरिवाग्निः स्वष्टुरर्केरिवेन्दु
र्बुधइव शिखिरांशोर्वैभवस्येव देवः,
तव पितुरनुरूपं गुणैर्लोककान्तै
रतिशयिनि समाप्ता वंशएकाग्निवंशे।

---

(१) अयं सोऽभिषेकसम्भारः।

(२) पितुस्ते वचनानि भवन्तु।

Digitized by Google

द्वितीयः।

तव पितरि पुरस्ताद्दुर्लभावस्थितोऽयं,
स्थितिमति च विभक्ता लक्ष्यनाकल्पधैर्य्ये,
अधिकतरमिदानीं राजते राजलक्ष्मी
र्हिमवति जलधौ च प्राप्ततोयेव गङ्गा।

रङ्गा। दिट्ठिआ सही, पुत्तअस्स जअरज्जसिरीं पेक्खिअ, भत्तुणोविरहे ण वट्टदि (१)।

उर्व्व। साधारणोज्जेव णो अभुदओ॥ कुमारं हत्थे गृहीला॥ जाद, जेट्ठमादरं वन्देहि (२)।

राजा। तिष्ठ; सममेव तत्रभवत्याः समीपं यास्यामस्तावत्।

नार। आयुषोयौवराज्यश्रीः स्मारयत्यात्मजस्य ते
अभियुक्तं महासेनं सेनापत्ये मरुत्वता।

राजा। अनुगृहीतोऽस्मि मघवता।

नार। भो राजन्, किं ते भूयः प्रियं करोतु पाकशासनः।

राजा। अतः परमपि, प्रियमस्ति यदि, भगवान् पाकशासनः प्रसादं करोतु ततः।

---

(१) दिष्ट्या सखी, पुत्रकस्य युवराजश्रियं प्रेक्ष्य, भर्तुर्विरहेण वर्त्तते।

(२) साधारणएव नोऽभ्युदयः। वत्स, ज्येष्ठमातरं वन्दस्व।

Digitized by Google

परस्परविरोधिन्योरेकसंश्रयदुर्लभं
संगतं श्रीसरस्वत्योर्भूयात् सुकृतिने सदा।

अपिच।

सर्व्वस्तरतु दुर्गाणि, सर्व्वोभद्राणि पश्यतु,
सर्व्वः कामानवाप्नोतु, सर्व्वः सर्व्वत्र नन्दतु।

॥ इति विक्रान्ताः सर्व्वे ॥

इति श्रीकालिदासकृते विक्रमोर्वशीनामनाटके पञ्चमोऽङ्कः ॥ समाप्तोऽयं ग्रन्थः।

—

99 980837

Digitized by Google

Digitized by Google

Digitized by Google



Digitized by Google

SANSCRITA BOOKS,

PUBLISHED BY

THE COMMITTEE OF PUBLIC INSTRUCTION,

AND

For Sale at their Depository, Pataldanga, near the Hindu College.

Laghu Kaumudí,..	2	0 0	लघुकौमुदी	२	
Mugdhabodha,.....	2	0 0	मुग्धबोध	२	
Bhatti Kávya, 2 Vols.	15	0 0	भट्टिकाव्य, दुई भाग	१५	
Siddhánta Muktávali, & Bháshá Parichheda	1	8 0	सिद्धान्त मुक्तावलि ? भाषापरिच्छेद ?	१।।०	
Nyáya Sutra Vritti,	2	8 0	न्यायसूत्रवृत्ति	२।।०	
Sáhitya Darpana,..	4	0 0	साहित्यदर्पण	४	
Vedánta Sára,.....	2	0 0	वेदान्तसार	२	
Dáyabhága, ...	3	8 0	दायभाग	३।।०	
Dáya Tatwa, ...	1	0 0	दायतत्त्व	१	
Vyavahára Tatwa,..	1	0 0	व्यवहारतत्त्व	१	
Dáya Krama Sangraha, ...	1	0 0	दायक्रमसंग्रह	१	
Mitákshará,.....	4	0 0	मिताक्षरा	४	
Kávya Prakása, ...	2	0 0	काव्यप्रकाश	२	
Mrichchakati,.....	3	0 0	मृच्छकटी	३	
Menu Sanhitá, 2 Vols.	7	0 0	मनुसंहिता, दुईभाग	७	

BIBLIOTECA ◆ RACC

Digitized by Google